॥अथ प्रतिष्ठानमहात्म्यप्रारंभः श्रीरामसमर्थो॥

॥श्रीगणेशायनमः॥ अथप्रतिष्ठामाहात्म्यारंभः॥ ॥माधवउवाच॥ ॥लक्ष्मीपते यद्भवतामोदितंश्रीप्रतिष्ठानमद्भुतं॥सिद्धेशमाहात्म्यमतीवपुण्यदंकृष्णामहा तोषनवासकानहे॥१॥पृच्छाम्यहंतानधुनाहमन्यच्छ्रीमत्प्रतिष्ठानउरःसमंतात्॥तीर्थानियान्तेप्रभुभर्यतानिवदस्वविघ्नंबहुपुण्यहानि॥२॥लक्ष्मीपतिरुवाच॥ माधवत्व मवधारयाधुनाक्षेत्रवर्यपरितःसुसन्मते॥तीर्थजातमहिमानमद्भुतंतंवदामिपरमादरा दिह॥३॥यद्वानदीसंगमभादिसंज्ञाभ्राज्यंयावद्धेतदंतः॥गंगाप्रतिष्ठानगता नितीर्थान्यनुक्रमिष्येशृणुमाधवत्वं॥४॥वृद्धैकारुंभगारिगोदुरितहंपेप्यंतथापि प्यकंगठंभार्गवमानुकृष्णकमलादोलाविसंहाश्वकं॥काकिंद्वोगैरेभैरवःकुरुगया तीर्थेशकंजासनेरामंपद्मगरेणुमोगवतिक्षीराब्धिवाडवं॥५॥प्रतिष्ठानमिदंक्षेत्रं द्वात्रिंशत्तीर्थमंडितं॥पुण्येनप्राप्यमनुजःसर्वपापैःप्रमुच्यते॥६॥वृद्धासंगम मारभ्य यावद्भाग्वनिनदी॥प्रतिष्ठानमिदंक्षेत्रंसर्वतीर्थोत्तमोत्तमं॥७॥यत्रयानितुतीर्था नीप्रसिद्धानिभुवानितु॥सावधानमनाभूत्वागदतोमेनिशामय॥८॥वृद्धासंगमतीर्थं तुयत्रवृद्धेश्वरोहरः॥गंगायादक्षिणेतीरेतत्तीर्थंसर्वकामदं॥९॥अत्रेतिहासंवक्ष्यामि

श्रवणात्सुखदायकं॥वृद्धहारीतचरितंनिबोधमहामते॥१०॥गंगायाःपश्चिम प्रांतेकोप्यस्तिमहिमाचलः॥तत्राश्रमंकल्पइत्वावृद्धहारीतसंज्ञकः॥११॥सर्वेंद्रिय बलह्रासकारिणीरूपहारिणी॥याजरासनयाक्रांतोबहुदुःखमवापह॥१२॥ श्रोतुंगंतुंतथाघ्रातुंमंतुंचापिविलोकितुं॥नशक्यतेंद्रियैःख्यातांदशामापेमुनिः ॥१३॥विलोक्यवृद्धहारीतःस्वांदशामतिदुस्तरां॥सुतीव्रतपसेयत्नमकरोत्तोत्तिदं तये॥१४॥लिंगंसंस्थाप्यविधिवत्स्वनाम्नागिरिमस्तके॥तदाराधनसंसक्तमनानि चसिनेंद्रियं॥१५॥निराहारोबहुदिनंतस्थौस्थाणुरिवाचलः॥बहुवर्षाण्यतीतानि तस्यवैतपसःक्षपः॥१६॥ततःप्रसन्नोभगवान्लिंगेप्रादुर्बभूवह॥नभाहब्रह्मणं प्रेम्णावृद्धहारीतमीश्वरः॥१७॥प्रसन्नोहंमुनिश्रेष्ठयाचयस्वेप्सितंवरं॥एवमुक्तो मुनींद्रस्तुमहेसेनाधवहारिणा॥१८॥शंकरेणैवमुक्तस्तुवृद्धहारीतसंज्ञकः॥द्विजस्तं प्रभुवाचेदंवचनंविनयान्वितः॥१९॥द्विजउवाच॥ ॥यदिदेवप्रसन्नोसीद्देहिमे मोक्षितंविभो॥सुरसंतोषहारिण्यापरमानिंद्रियाणशं॥२०॥ज्ञानकर्मेंद्रियाशेष शक्तिसंहृतिरूपया॥नरयाहंपीडितोस्मीतामेतांवारयप्रभो॥२१॥तयाग्रस्तोस्मि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

सर्वशोच्याघेणमृगशावकः॥२३॥ ॥लक्ष्मीपतिरुवाच॥ ॥एवंश्रुत्वातुतद्वाक्यं परमात्मारूपानिधिः॥प्रहस्यनेजमाहेदंसुभद्रंगणसंयुतं॥२३॥हेसुभद्रगणश्रेष्ठवृद्ध हारीतसंज्ञक॥ब्राह्मणंजरसारिवन्दंमत्तस्तिर्थेनाभिषेचयेह य॥२४॥एवमुक्तःशंकरेण सुभद्रोगणरत्नयुतः॥एशंपद्मजवृद्धंमभिषिच्यसरोवरे॥२५॥तत्सरोवरजातेनजले नश्चिनामभिः॥ओभिषेचयदीशोनपार्श्वेयावद्रवेतं॥२६॥तावत्तस्यशरीरातुज लेनसहनिर्गता॥जरापापीयसीसाचप्रोवाचगिरिजापतिं॥२७॥ ॥जरोवाच॥ ॥ भिनिष्कासिनारेवयस्मात्वयदेहशरीरात्द्विजस्यातिपुण्यात्मनोवै॥द्विजोपेक्षितोहं कयाभिशंभोममोद्धारमाद्यवरस्वाविलेश॥२८॥पुनर्द्विजस्वरूपयानिगुप्त स्मष्टुंनशक्यःस्वदतीप्रियोऽसौरूपंममोपर्यधुनाकुरुष्वयदाधुनामेहितमातदिंद्या ॥२९॥ ॥शंकरउवाच॥ ॥जरेमाद्यथापीतिक्लेशंत्वमद्यत्यजद्वारमाद्यवरामिस्फुटंवै॥ प्रयाहिस्वरूपेणगच्छानुरूपंयेमिक्ष्मसीस्वच्छतोयांहिगोदां॥३०॥यस्याःस्पर्शनमा त्रेणब्रह्महत्यादिपातकं॥क्षयंयांतिनृणांधन्यातयायोगंप्रयास्यसि॥३१॥यानारा यणपादपद्मयुगलाविर्भूतिराजज्जलायामनोक्लिविभूषणंचजगतिमुक्तासुमा

लायिता॥नानोपार्जितिहत्यपुण्यनिचयेरत्नंवेतयासंगताद्रक्षेहास्यसिनैजपा पानिचयंमुक्तिंपरामाप्स्यसि॥३२॥इत्युक्त्वाशंभुनावृद्धाजराहारीतदेहतः॥अभि षिक्तासुभद्रेणनदीरूपेणनिर्गता॥३३॥सापूर्ववाहिनीभूत्वागंगामागत्यसत्वरा॥ लिंगंसंस्थाप्यतद्देशंगंगयासहसंगता॥३४॥विश्रांतिंपरमांप्राप्यानतत्संग मोवरः॥वृद्धासंगमइत्याख्योग्रासःसर्वाघनाशनः॥३५॥तत्रयोगेश्वरीदेवी सर्वेशानिष्टतेपरा॥यस्याराधनमात्रेणसर्वसिद्धिर्भविष्यति॥३६॥येवृद्धासंगमे स्नांतितद्देशंपूजयंतियेयोगेश्वरींपूजयंतिसर्वेषांतत्फलंसमं॥३७॥तेरुद्धा अपिरुद्धत्वेदुर्दशांनानुवंतिवै॥ ॥लक्ष्मिपतिरुवाच॥ ॥येनैवृद्धासंगमस्येति हासंश्रृण्वंतेयेचात्रभक्त्यापठंति॥तेसर्वेमानवाःशुद्धिमंतःशंभोर्भक्ताःसर्वसौख्यं लभंते॥३८॥ ॥इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमाहात्म्येद्वादशोध्यायः॥ ॥माध वउवाच॥ ॥वृद्धासंगममाहात्म्यमेतदुक्तंत्वयामम॥एकासंगममाहात्म्यंवदलक्ष्मी पतेऽधुना॥१॥ ॥लक्ष्मीपतिरुवाच॥ ॥एकासंगममाहात्म्यंमधुनाशृणुमाधव॥ यस्यस्मरणमात्रेणनरःपापैःप्रमुच्यते॥२॥सह्यद्रोण्यामतिप्रख्यमस्तिह्येकपुरंवरं॥

शिवाख्येनशोभाढ्यं नानावृक्षोपशोभितं।।३।।शिवाख्येतत्र शिवानुशैसा
यंसमागत्यजगद्धितौविणो।।यत्रोमयास्थापितंनेहयंकुंकुमनिर्मितं।।घस्रणे
शइतिख्यातंलिंगंप्रादुर्बभूवह।।४।।यस्यदर्शनमात्रेणवाजपेयाधिकं फलं।
प्राप्नोतिनासयत्राहो घस्रणेशोविराजते।।५।।यन्नामस्मरणादेवमहापातक
संततिः।।नाशमायातिमत्रासौघस्रणेशोविराजते।।६।।ज्योतिःस्वरूपालि
विराजमानभूमिस्थितद्वादशलिंगमध्ये।।मण्यायितंसर्वजनाघहारियत्रास्ति
लिंगंघस्रणेशसंज्ञितं।।७।।यत्रात्रकामल्लसुपल्लवमंजरिषुगुंजद्भृंगसंगी
तहालसंती।।सौरभ्ययुक्तविकसत्सरसीरुहाणिसौगंध्ययुक्तकुसुमावलिवृ
क्षसंघाः।।८।।तस्मिन्पुरेसकलभूपतिकायवर्यएलाभिधोनृपवरोभ्यगुणो
भवत्।।आकर्णपूर्णसुविराजिविशालनेत्रसामुद्रिकाखिलसुलक्षणराजमा
नः।।९।।तस्यासदूर्जनिसंघहृतोरपुण्यलभ्यानुकूलगुणसंघविराजमाना।
भार्यातिभक्तिसहिताहरभाद्यपद्मेनाम्नासुकीर्तिरितिभूवलयेप्रसिद्धा।।१०।।
तयोर्यहिस्याश्रममारुरेणप्रकुर्वतोराचणेःपवित्रैः।।कन्यासुरूपासगुणाबभूव

[redacted]तन्नामचैकोतिचन्नत्रतुस्तो।।११।।आहूयब्राह्मणा
न्सर्वान्वसिष्ठान्त्रिउरोहितान्।।कन्यागणपतेःपूज्यांपुण्याहादित्रयंतथा।।१२।।
तस्येप्रेम्णासुनामेवदंपतीराजातिधार्मिकः।।तस्मिन्महोत्सवेराजाब्राह्मणेभ्यउ
दारधीः।।१३।।धेनूश्चवस्त्राणिचकांचनानिग्रामांश्चसब्राह्मणसाच्चकार।।सं
तुष्टसर्वागमविद्वराशीर्जग्राहचैलानिधारूपवर्यः।।१४।।तेसर्वेमुनयस्तेन
पूजिताश्चतदाज्ञया।।तद्दत्तवित्ताभरणाजग्मुःस्वानाश्रमान्प्रति।।१५।।ततःसा
वत्सरेबालागृहेताभ्यांसुपोषिताः।।रूपलावण्यसंपन्नाशुक्लपक्षेयथाशशी।।१६।।
कदाचिदत्यंतसुपुण्यकालेपुरेसमाजस्यरथैकसंज्ञे।वासिष्ठमुख्याऋषिवर्यसंघाः
शैवाख्येस्नानधृताग्र्यवांछाः।।१७।।ब्रह्मादिवंद्यांघ्रिसरोजयुग्मंश्रीपार्वतीशंघ
स्रणेशसंज्ञं।।विलोकितुंधूर्जटिमप्रमेयमनाथबंधुंकरुणैकसिंधुं।।१८।।शिवाख्
येस्वच्छजलेऽवगाह्ययथाविधिप्राप्तसुरक्तमुनीक्षाः।।नानोपचारैःपरमादरेणेति
पूजयंतंघस्रणेशसंज्ञं।।१९।।योहाहाकृत्वभुवनंत्रस्तंप्रदहंपपौकाल
व्येकनिधिर्निजोदरगतंब्रह्मांडरक्षाशया।।कंठेकुंठमतिर्धारकरुणावरांधिःशं
भु

क्रुरः स्तंदेवं प्रविलोक्यहर्षमतुलं प्रापुर्मुनींद्राः परं।।२०।।ततएलाभिधोराजा मुनिन्स्वयाममागतान्।।श्रुत्वाप्रसन्नामायसहितःस्वपुरोधसां।।२१।।तान्नमस्कृत्य हृष्टात्माप्रस्फुरद्वाचमसन्नधीः।।धन्योमेजननीतातौधन्यंमेजन्मगोद्विजाः।।२२।। धन्यामेगृहिणीपुत्राःसर्वेपिसुहृदस्तथा।।भवद्दर्शनयुग्मानियद्दृष्टानिमयाधुना।।२३।।इदानींमत्कृतंपुण्यंभवद्भिःकार्यमेववैः।।भविष्यतिहितद्दन्यंभवतांपादरेणवः।।२४।।ततस्तत्स्वार्थितान् सर्वेसुनयोराजमंदिरं।।प्रवेश्यपूजिताःसर्वैरात्मसंमानितादृशं।।२५।।राजाहरेणमहतानत्वातेदिवसाष्टकं।।ऊषुःशिवात्मजेस्नात्वाघृष्णेशप्रपूजकाः।।२६।।राजारात्रौचतत्राहोतेषांहास्यंप्रचक्रमुः।।एवंगतेषुकतिचिद्दिनेषुदुहितातयोः।।२७।।एलातेषांप्रणामादिनाकरोदपिभाषणं।।पित्रभ्यांप्रेरितापिभाक्त्यापमोहितचेतसा।।२८।।तयाचमानिताः सर्वेऋषयःकृतमानसाः।।तस्यैशापंदुवारिक्षेपपूर्वमुनीश्वराः।।२९।।अवज्ञानाशिनोयस्माद्दित्रभ्यांप्रेरितापिवै।।तस्मात्वंभवतात्सरित्पर्वतीरूपवतीरूपवतीऽधमे।।३०।।एलानामनदीपापेशेषाद्रिशिखरोद्भवा।।अवत्साफलमत्रैवसतांसुस्वन्तपांगजे।।ततःशापं

समाकर्ण्यकंपितानृपदारिका।।पपातनेषांमग्रेवैरेणाबानहतायया ।।३२।।तातुवाचचदिनाहंभवनांशरणंगता।।क्षमध्वमपराधंमेसाधवो हिदयालवः।।३३।।ऋषयस्तामथोचुर्वैसर्वथाशरणंगतां।।राजकन्येत्वमुत्तिष्ठघृष्णेशंतुहिप्रभुं।३४।।अस्माच्छापान्तदेवत्वंमोक्षसेनात्रसंशयः।।अथसाऋषिभिर्युक्ताघृष्णेशंजगामवै।।३५।।अस्तोषीद्राजकन्यातंसम्यग्वचनमालया ।। ।।राजकन्योवाच।। ।।कृतलिप्रभवच्छायभोगीरिजालिंगितदेहहेविभो।।शशिखंडविराजितसेखरत्वमहोभालविराजितलोचन।।३६।।वृषराजयुताध्वजप्रभो रविशाकरवन्हिलोचन।।फणिभूषणमंडितश्रुतेकृपयामामवलोकयप्रभो।।३७।। करकोतुकसंधृतेणबालमलराकाकररंडशोभिभाक्।।भवदुर्विषहज्वराभिभूतांकृपयामामवलोकयस्त्रीनां।।३८।। ।।लक्ष्मीपतिरुवाच।। ।।एवंस्तुतःसभगवान् घृष्णेशःकलानिधिः।।राजकन्यांप्रस्फुरद्वाचंवचःश्रुतिसुखावहं।।३९।। ।।श्रीघृष्णेश्वरोवाच।।स्तुत्यानयाप्रसन्नोस्मिराजकन्येवरंवृणु।।एवमुक्तराजकन्या

प्रोवाचेदंवचोहरं॥४०॥ ॥राजकन्योवाच॥ ॥यदिदेयोवरोमह्यंशापोयंविनिवर्त्यतां॥पुनस्त्वांशंभुराहेदंद्विजशापोनवैमृषा॥४१॥नदीभविष्यसिसखेपुनश्चमदनुग्रहात्॥गोतम्यांसंगताभूत्वापुनर्मच्छोकमाप्स्यसि॥४२॥हेभगवन्याःसरसीभूत्वौर्ध्वगोतमीयत्रासंगमनंपवै॥तत्रैवदिव्यरूपासात्वंगंसंस्थाप्यसंगमे॥४३॥कैलासमगमद्धृष्टाघृत्वणेशायनुग्रहात्॥४४॥एकायाःसंगमेस्नात्वाचैकेशंपरिपूजकाः॥सर्वपापविनिर्मुक्तःकैलासमधिगच्छति॥४५॥ ॥लक्ष्मिपतिरुवाच॥ ॥यश्चैतदाख्यानमहोशृणोतिपठेतवामाधवयोमनुष्यः॥सशुद्धबुद्धिर्जगतामधीशेभक्तिंसमासोतिभवाब्धिपोतां॥४६॥ ॥इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमहात्म्येएकासंगमवर्णनंनामत्रयोदशोध्यायः ॥लक्ष्मिपतिरुवाच॥ ॥एकासंगमपुण्यतीर्थमहिमाहेमाधवत्वांप्रतिप्रोक्तःसर्वसुखावहः॥शुभमतेशुद्धात्मनांवैनृणांसौभाग्यावरसंगमस्यसुखदंमाहात्म्यमाकर्ण्यतांसद्यःपापविनाशनंश्रवणतोमद्भक्तोनिःसृतं॥१॥कदाचिदमरावत्यामभूत्पूर्वंमहोत्सवः॥देवर्षिगणगंधर्वाःसमाजग्मुर्महोत्सवे॥२॥लक्ष्म्यासहजगंनाथःसमाकारितआययौ॥पार्वती[illegible]यासहशंभुश्चरुद्रादिगणसंवृतः॥३॥ब्रह्मंहंससमारूढोगायत्र्यासहसंययौ॥पावकःस्वाहयायुक्तोमेषारूढःसमाययौ॥४॥यमोपिसपरिवारोमहिषासनसंस्थितः॥निर्ऋतिःसपरिवारःसोप्यगादमरावतिं॥५॥अपांपतिरपिश्रीमान्समरुद्भिःस्वगणैर्वृतः॥प्रभंजनोप्यगात्तत्रसर्वेषांजीवनप्रदः॥६॥गंधर्वैःसहितस्तत्रजगामनरवाहनः॥इशानोपिवृषारूढःसपरिवारओययौ॥७॥गंधर्वाप्सरसःसिद्धायक्षराक्षसपन्नगाः॥देवर्षयोनारदाद्यासिद्धाराजर्षयस्तथा॥८॥गंधर्वगायनंचक्रुर्नृत्तुश्चाप्सरोगणाः॥वैतालिकास्तुनिंचक्रुर्लोकपालादिवौकसः॥९॥एवंसमाजेदेवानांसमारब्धेमहोत्सवे॥संतोषंपरमंप्रापुरमराःसपुरंदराः॥१०॥अस्मिन्नवसरेदेवराजस्याभून्मनोरथः॥प्रत्येकमप्सरोनृत्यवीक्षणेसुरसंसदि॥११॥ततोघृताचिप्रमुखावरांगनाश्चक्रुःसुनृत्यानिसगायनानि॥तोषायशक्रस्यसुरोत्तमस्यतुष्टेप्रभोकिंकिमलभ्यमस्ति॥१२॥प्रत्येकमस्परोभिश्चस्वस्वनृत्येप्रदर्शिते॥संतोषंपरमंजग्मुःसर्वेदेवाःसवासवाः॥१३॥दृष्टंसर्वाप्सरोनृत्यंविनारंभांस्तुवर्णिनां॥रंभानृत्यायतेसर्वेबभूवुरभिलाषिणः॥१४॥तामयोचुःसुराःसर्वेरंभेदर्शयकौतुकं॥स्वनृत्यस्यविशेषेणसर्वोत्कृष्टासिवैयतः॥१५॥साचरूपेणनृत्येनगीतेनातीव

गर्विता संप्राप्तौवनोत्सं दर्शयामास तान्सुरान् ॥१६॥ तत्रस्तु नारदः क्रुद्धस्तानवोचत्सुरान्प्रति ॥ दर्शितंचरचनृत्यंवैरसंवैरिक्षरसांगणैः ॥१७॥ रंभान दर्शयसेषा किमर्थं निजकौतुकं ॥ प्रायशोनिजलावण्यकलाकौशल्यमोहिता ॥१८॥ तस्मादसंतगर्विष्टरंभेयंशपमर्हति ॥ सर्वविलासयुताचैषा निर्लगाभवतुस्फुटं ॥१९॥ रंभांप्रशपवाचंथापिनारदः क्रोधसंयुतः ॥ रंभेसर्वसुरावज्ञ युक्तांनिर्लगाभव ॥२०॥ नगशृंगादिरूढाणांमूरवाणामाततायिनां ॥ हस्तपादादिभंगायशिक्षाहिपतनंवरं ॥२१॥ तस्मादियंचलावण्यरूपनिर्गर्विता ॥ तस्मादियंसदोन्मत्तासौभाग्येनातिगर्विता ॥२२॥ सौभाग्यमदगर्वेणसुरास्त्यक्तंगतस्त्रपा ॥ सौभाग्येतिसमाख्यातालंनदीभवकानने ॥२३॥ एवमुक्तानारदेनदेवा भयसमन्विता ॥ चकंपेतिभयेनैवरंभागानहतायथा ॥२४॥ ततोनामसाक्षंगेमा रदायमहात्मने ॥ उवाचवचनंचोद्यंरंभानारदपाहिमां ॥२५॥ अपराधंक्षमस्वा द्यपापायाममसर्वथा ॥ उन्मादःप्राणिनःस्वस्यघातकःपरिकीर्तितः ॥२६॥ पाप पंकनिमग्नांचंमामुद्धरजगद्गुरोः ॥ त्वयिरुष्टेजगद्दृष्टंकोमेत्रातापवेदिह ॥२७॥

तस्माद्दुर्द्धरमांस्वामिन्यापचारान्तिदुस्तरात् ॥ त्वदेकशरणायामेगतिर्नास्ति सुनिश्चितं ॥२८॥ इतितस्यावचश्रुत्वासत्योनारदोमुनिः ॥ तांतुवाचागतार्हिनीं रंभांशोकसमन्वितां ॥२९॥ रंभेस्तुहिजगद्गुरुं यंनारायणमनामयं ॥ सदेवदेवोगो विंदःत्वांशापात्परिमोक्ष्यति ॥३०॥ ततोरंभाजगन्नाथंदेवदेवमनामयं ॥ अस्तौषीदितिरचवचनामृतमालया ॥३१॥ ॥ रंभोवाच ॥ ॥ योगध्यानिजलक्रीडबलवता ग्राहेणपादेधृतंराजीवायतलोचनंद्वययुतः क्रूरप्यघांनिधिः ॥ ग्राहास्यात्परिमो चयत्रजपतिंचक्रेणदीनंबलाद्दार्त्तत्राणपरायणः सभगवान्नारायणोमेगतिः ॥३२॥ यःप्रत्यूहमतिप्रचंडदितिजःप्रारब्धकीलालधीःप्रक्षेपोच्चगरिप्रपातहुतभुग्ग्रा हाधसंघातनः ॥ नामोच्चारणतत्परंहृदिकृतध्यानंह्यमंदादरादार्त्तत्राणपरायणः ॥ सभगवान्नारायणोमेगतिः ॥३३॥ यःपांचालकुलामनीतिसमेदुर्वाससायाचितांभुक्त्यर्थंपरमापदंगतवतीसंपादिताशेनृपे ॥ त्राहिश्रीरहसखेतिवदतीमाद्रौचसंक्रंदतत्आर्त्तत्राणपरायणः सभगवान्नारायणोमेगतिः ॥३४॥ देव देवजगन्नाथकरुणाकररमापते ॥ पापाचारंजगन्नाथपाहिमांदुर्गतिंगतां ॥३५॥

एवंनिपतितांदृष्ट्वाभूमौप्रसभमीश्वरः॥लामुवाचप्रसन्नात्माकरुणासागरोहरिः
॥३६॥ ॥हरिरुवाच॥ ॥सुखानयाप्रसन्नोहंरंभेतत्कृत्तयासुभे॥ऊभीप्सितं
चयाचस्वकामंतपूरयाम्यहं॥३७॥ ॥रंभोवाच॥ ॥नारायणहृषीकेशगोविंदा
नाथैकवत्सल॥भीतान्नारदशापाद्वैतस्मान्मामुद्धरेश्वर॥३८॥ ॥श्रीहरिरुवाच
मयानारदवाक्यंचशक्यतेकर्तुमन्यथा॥तथापित्वांमोचयिष्येभुक्त्वाशापंसुरांगने
॥३९॥माचिंतांकुरुदिव्येवलक्षतेभूत्वानरीवाक्यतोदेवर्षेर्विषसह्यसानुनि
ततोमत्संस्कृतेवैफलं॥भुंक्ष्वात्मन्नरणारविंदमकरंदीभूत पाथोवहायागंगा
त्रिजगत्पवित्रकरणीयातातयासंगमं॥४०॥सोभाग्येत्वंनदीरम्यागोतम्यासहसं
गता॥तत्रलिंगंप्रतिष्ठाप्यसोभाग्येश्वरसंज्ञितं॥४१॥तंसंपूज्यविधाने
नदेवदेवजगद्गुरुं॥क्रूरान्नारदशापाद्वैमोक्ष्यसेनात्रसंशयः॥४२॥यांहाला
हलसंतप्तानकमहासंतापसंतापितश्रीशंभोर्विकसत्कृपहृन्निलयाविश्रांति
संपादिनी॥स्नानाद्यैःसकलाघसंघशमनीत्वंवैतयासंगतास्चावस्थां
प्रतिपद्यसौख्यमतुल्यांहिध्रुवंगंगया॥४३॥- ॥लक्ष्मीपतिरुवाच॥ ॥

एवंभगवतोवाक्यंश्रुत्वानुग्रहसन्निभं॥सह्याद्रिसिखरेसावैनिम्नगा
समजायते॥४४॥सोभाग्येतिप्रसिद्धावैगौतम्यासहसंगतो॥लिंगंसंस्था
प्यविधिवत्सोभाग्येश्वरसंज्ञितं॥४५॥तंपूजयित्वाविधिवद्रंभासांत्वमायवै
दिव्यंविमानमास्थायंजगामत्रिदशालयं॥४६॥रंभाकृतैनस्तोत्रेणयःस्तौतिप्रय
तोहरिं॥संश्रीहरिप्रसादेनपरमंसुखमश्नुते॥४७॥इतिहासंपुरातनंश्रृणुतेमा
धवयोथवापठेत्॥सहरौभवनाशिनींमतींलभतेकलियुगेपिशोभनां॥४८॥
॥ ॥इतिश्रीब्रह्मांडपुराणेपतिष्ठानमाहात्म्येसोभाग्यसंगमतीर्थवर्णनंनाम
चतुर्दशोध्यायः॥ ॥ऋषयऊचुः॥ ॥कथामिमांत्वमुखतोविनिर्गतांवृद्धै
कसौभाग्यमहित्वगोचरां॥भोसूतनिश्रांतिमगान्मनःपरांश्रीचक्रतीर्थस्यकृ
थांवदाधुना॥१॥ ॥सूतउवाच॥ ॥एवमेवपुरापृष्टःरचयुर्मधवेनवै॥ल
क्ष्मीपयोनिधिःप्राहकथांशृण्वंत्विमांमुनां॥२॥ ॥माधवऊवाच॥ ॥श्रील
क्ष्मीपतिपादयुग्मयुगलंध्यानैकतत्सावयंश्रीलक्ष्मीपतिमेवसद्गुरुवरंत्वामेव
पृच्छामहे॥सुखेवत्रिमहित्वमुक्तमधुनाश्रीचक्रतीर्थेदृवंमाहात्म्यंवदविद्

दीक्षितपरलोकोपकारायवै ॥३॥ ॥लक्ष्मीपतिरुवाच॥ ॥शृणुष्वहेमाधव सन्मनीषश्रीचक्रतीर्थस्यकथांसुरम्यां॥आकर्ण्ययांसर्वजनःसुखीस्याद्विलीनपापां श्रुतिसौख्यदात्रीं॥४॥अत्रेतिहासंवक्ष्यामिशृणुमाधवयत्नतः॥यस्यश्रवणमात्रेण नरोदुःखातिगोभवेत्॥५॥पुराहिकैलासपुरेकदाचिन्महोत्सवेसर्वसुरैकहेतौवृत्ते हरिब्रह्मसुरेशाःसुरोघाःसर्वेसमाजग्मुरथर्षयश्च॥६॥सभागतान्कांचननिर्मितेषु सिंहासनेषुप्रतियानपूर्वकं॥यथाययंतानुपवश्यशर्वःप्रपूजयामासगणेहिसर्वान्॥७॥पूजयित्वासुरान्सर्वान्मनोधारणपूर्वकं॥ऋषीन्विसर्जयामासगताःसर्वेयथागतं॥८॥तेषुसर्वेषुयातेषुस्वस्वलोकान्तथाश्रमा॥यास्यन्नूनंचाश्रमंदक्षोविषण्णवदनोभवत्॥९॥मार्गेविचारयामासापराधंशंभुकारितं॥विष्णुब्रह्मादिषुमहामानःसंपादितोमुना॥१०॥मयिसाधारणेमानेमुनिभिर्वैसमंकृतः॥अहंहिश्वशुरस्थपूज्योमामकैर्हेलनं॥११॥कृतंतेननतःसोपियुक्तोमद्धेलनायवै॥एवंविचार्यदक्षोपिगत्वास्वाश्रममादरात्॥१२॥प्रारभद्यज्ञमतुलंशर्वविज्ञानहेतवे॥सौवर्णंयज्ञवाटंवैचक्रारातिभयंकरः॥१३॥सर्वानाकारयामासदेवर्षिपितृमानवान्॥धर्मकश्यपचंद्रादीनृजामातॄंश्चयत्नतः॥१४॥तेसर्वेप्यायुर्हृष्टाःसपत्निकाःसबांधवाःआकारितादुहितरःसर्वेस्नेहसमन्विताः॥१५॥तथाजामातरःसर्वेप्यानिताःशंकरंविना॥देवादीनांसमाजेतु

तत्रस्थानांमहोत्सवः॥१६॥दिव्यालंकारवस्त्राणांबभूवतडितामिव॥प्रजावतीदेवरशालकाद्यापरस्परंचक्रुरयोविनोदान्॥१७॥परस्परंयक्षविलेपनाद्यैःसिंचंतिरंगोदकजैर्निषेकैः॥नरत्नसुतुर्येषुसुवासिनिषूनीराजनस्थानकसत्करासु॥१८॥आरोपिरेब्राह्मणवर्यसंघारत्नस्यदीक्षाविधिमंत्रयुक्ता॥प्रधानतांगत्वविवादसक्तद्विजेषुकोलाहलमाचरत्सु॥दध्यीचिरत्यायतलोर्ध्वबाहुःसंबुध्यसभ्यानुभवप्रकर्षः॥ ॥दधीचिरुवाच॥शृण्वंतुसभ्यावचनंमदीयंरुद्रेनयज्ञःप्रतिपादितोपि॥२०॥नशोभतेप्राणविहीनदेहोयथासुवस्त्राभरणैरुपेतः॥विनाहरेणाखिलमंगलेनह्यमंगलत्वंप्रजगामयागः॥२१॥नानाकसत्कांचनभूषणापीसुवस्त्रनारीमृतभर्तृकेव॥एवंवचनमाकर्ण्यदधीचेर्दक्षदीक्षितः॥२२॥रुद्रोवचनमाहेदंदधीचिप्रमुखान्द्विजान्॥कपालिखंडमाकीर्णभस्मयःसोमंगलःप्रभुः॥२३॥भवनदीयःशिवस्तस्मान्मयानाकारितोमखे॥शिवनागमनंयेषांरोचतेतेत्रसंतुवै॥२४॥ओमि[illegible]पयांतुमखात्सवैशिवागमनकांक्षिणः॥इतिरुद्रवचःश्रुत्वादधीच्यादिमहर्षयः॥२५॥मखशालागताःसर्वेनिर्ययुःशिवदुःखयः॥गतेषुतेषुयज्ञेवैयथापूर्वमवर्तनपश्चिष्टोमसकलनांगैश्चसमायुतः॥२६॥

मतस्मिन्समयेयज्ञवाटदुत्थायनारदः॥केकासमगमच्छंभुंदृष्ट्वानत्वाविजिज्ञपत्॥२७॥शृणुशंभुजगन्नाथसुभाश्चर्यंमियोदितं॥विनाभवंतंदक्षस्यकथंयज्ञमहोत्सवः॥२८॥तत्रजामातरःसर्वेकिन्यकाश्चसमागताः॥नानासुवस्त्राभूषाढ्याविचरंतिसुतान्विताः॥२९॥तवादृष्ट्वाभवंतंवैभवानिचजगन्मयी॥ममांतःकरणेजातोविवेदनः॥३०॥तस्मादिहसमायातःस्वामिनंप्रतीकिमिहेक्षयज्ञस्यभवितव्यंनतत्क्वचित्॥३१॥इतिश्रुत्वासभगवान्तूष्णीमासजगत्पतिः॥क्षमासमुद्रःसर्वात्माजगतांपरिपालकः॥३२॥ततःकुद्धोजगन्नाथापार्वतीसर्वशंभुमब्रवीत्॥स्वामिन्नहंगमिष्यामीदक्षदर्शनहेतवे॥३३॥अनुज्ञातागमिष्यामीनानुज्ञातापियामिवै॥इत्युक्त्वासहसोत्थायनमस्कृत्यशिवायवै॥३४॥जगामरिक्तहृदयायज्ञवाटस्यसन्मुखी॥तामन्वयुःशिवाःसर्वागणानंदिमुखास्ततः॥३५॥मध्येमार्गेधावमानास्तामासाद्यचनंदिना॥बलात्स्वपृष्टमारोप्यततस्तेतांसमन्वयुः॥३६॥यज्ञवाटमनुप्राप्यनंदिनाह्यवरोपिता॥यज्ञशालांजगामाशुदक्षाविण्यविकंपिता॥३७॥सानीननापितुरंतथामातरमेवच॥प्रोवाचमांविनाकस्माद्यज्ञप्रारंभणंकृतं॥३८॥ततोदक्षमुखा

ऋत्विगंशंदृष्ट्वाभवान्यपि॥यज्ञवाटस्थितेकुंडेदेहांचिक्षेपदीपिते॥२९॥हाहाकारोमहानासीसुरासुरनृपिःकृतः॥इमंवृत्तांतमाकर्ण्यहरोनारदवक्त्रतः॥४०॥क्रुद्धआस्फालयामासजयमुसाद्यवैभुवी॥तदास्फालनमात्रेणवीरभद्रोविनिर्गतः॥४१॥भूतकोटिसमायुक्तोदक्षयज्ञस्थलंययौ॥नानाप्रथमसंघातडाकिनीशाकिनीयुतः॥४२॥तंकृधांतकसंकाशंवीरभद्रंसुरारयः॥दृष्ट्वादूरास्थितंकेचित्पलायनपरायणाः॥४३॥पूर्णंतेषुधृत्वावैवीरभद्रउवाचनं॥कथंत्वयायज्ञहनंजिघांसर्वविनाशकं॥४४॥तस्माद्वंतान्पाटयिष्येसमहंतोमवाधुना॥तस्मात्रपिष्टभागोसौपूषायज्ञेषुगीयते॥४५॥भगःशर्वंविनासक्ष्यानाहरेणत्यलोकयत्॥तस्मादस्यचनेत्रेवैनिष्कृशयतवेगेणाः॥४६॥एवंदेवानांगनाश्चऋषिन्प्रासान्व्यउंबयत्॥दूरेदूरेयतमानास्तेसर्वेपिपलायिनाः॥४७॥एवंविध्वंसितेयज्ञेवीरभद्रेणतस्यवै॥दक्षोविष्णुंजगन्नाथंजगामशरणंविभुं॥४८॥उवाचवीरभद्रत्वंगीतंमांरक्षरक्षहे॥इतिदक्षवचःश्रुत्वादक्षुशंकरहेलनं॥४९॥किंत्वयत्नमकरोत्सुदर्शनमयासिपत्॥श्रीशंकरस्यसामर्थ्याद्वीरभद्रस्यसत्॥५०॥यस्तेचक्रेततोविष्णुर्वैकुंठमगमज्जवात्॥ततोब्रह्मासुसंप्रा

थ्यशंकरंलोकशंकरं॥५१॥वीरभद्रेणनिहतंदक्षंपुनरजीवयत्॥छिन्नकर्णारिकान्सर्वान्यथायोग्यमकारयत्॥५२॥ततःस्वीयंमहादेवःकैलासमगमत्पुनः॥चक्रंविणा महाविष्णूश्चिंतामापमहत्तरां॥५३॥ततोगोदावरीतीरेप्रतिष्ठानेहरिःस्वयं॥सौभाग्यसंगमाख्येसहस्रधनुरंतरे॥५४॥महेश्वरंनामलिंगंदृष्ट्वोद्देशसंस्थितः॥चक्रप्राप्त्येमहेशानंतुष्टावजगदीश्वरं॥५५॥ ॥श्रीहरिरुवाच॥ ॥श्रीमन्महेशजगदेकनिधानमूर्तेनेत्रोत्थशोचनजपावकदग्धकाम॥कामप्रपूरकनिजार्चनतत्पराणांचक्रंममार्पयसुरेशनमोनमस्ते॥५६॥लोकत्रयातिभयकारकदुन्नयानदुष्टांतरत्रिपुरसूदनदक्षयज्ञे॥रचणद्विचापपृथ्वीरथवेदबाहरेवेशदेहिममचक्रमनंतकीर्ते॥५७॥इंद्रादिदेवगणतापविशेषकारीमत्तांकांतकरणसमशूलपाणे॥योगीश्वरेश्वरनिजार्चकमुक्तिदायीन्चक्रंविष्णोर्पयममेशनमोनमस्ते॥५८॥ ॥श्रीलक्ष्मीपतिः॥ ॥इतिस्तुतिंसमाकर्ण्यश्रीशंभुहरिकाव्यितां॥लिंगात्प्रत्यक्षतापन्नःसमालिंग्यरमापतिं॥५९॥उपवेश्यहरिंसाक्षाज्जगन्नाथोवरासने॥प्रेमविह्वलसर्वांगःसमाहहरिमादरात्॥६०॥ ॥शंकरउवाच॥ ॥यामस्तुतिःकृतादेवसानवैवस्तुतिःखलु॥नावयोर्विष्णुशिवयोरंतरं

विद्यतेण्वपी॥६१॥चक्रंगृहाणहेनेशमत्समीपेस्थितंतव॥अहंगोदावरीतीरेमहेशइतिविश्रुतः॥६२॥मदुद्देशंसंस्थोहीचक्रेशोभवदेवहे॥लिंगरूपेणतत्राहंस्वयमूर्ध्वचिसंस्थितः॥६३॥अत्रत्यंवसलोकानामुपकारायमापते॥त्वंनाम्नेहंसमाख्यातंचक्रतीर्थंभविष्यति॥६४॥इदंश्रीद्वारकातुल्यंमथुरातुल्यमेवच॥विष्णुकांचिहरिद्वारसमानंनात्रसंशयः॥६५॥यत्रश्रीचक्रतीर्थेवैश्रावणेपिहिलांछिताः॥चक्रेणपरिदृश्यंतेगंगायामधुनापिच॥६६॥एतस्मिन्नंतरेतत्रकौतुकाविष्टदृष्टयः॥नारदेनसहैवैतेसभाजग्मुस्वराज्ञिताः॥६७॥तांनदृष्ट्वाभगवानाहमहेशोलोकपालकान्॥भवद्भिर्लिंगरूपेणस्थातव्यंचक्रतीर्थके॥६८॥चक्रेश्वरस्यपरितोनात्रकार्याविचारणा॥भैरवेणसमायुक्तोगणेशमयत्रतिष्ठतु॥६९॥लिंगरूपीनारदोपिगंगायामत्रतिष्ठतु॥यस्यदर्शनमात्रेणकलिनानैवबाध्यते॥७०॥चक्रेशविष्णोतवचक्रतीर्थेस्नात्वानरास्त्वांपरिपूजयंती॥श्रीचक्रपाणेजगदीशविष्णोदीनानुकंपिन्मधुसूदनेती॥७१॥नमोस्तुनारायणशार्ङ्गपाणेश्रपुंडरीकाक्षहरेरमेश॥श्रीवासुदेवाखिलगीतकर्तेति॥प्रसीदविश्वेश्वरहेसरेति॥७२॥एवंयस्तुवंतिलोकातुतेधन्यामोक्षभागिणः॥अनुभूयेहिकंसोख्यंवि

ष्णुलोकंवृजंतिते ॥७३॥ तस्माद्विष्णोपरानंदचक्रतीर्थेस्थिरोभव।उद्धरायहिलो
कानांकृपालोभक्तवत्सल॥७४॥ एवंसंप्रार्थितोविष्णुर्भगवान्चंद्रमौलिना॥च
क्रेश्वरासन्निधश्चक्रतीर्थंवासमथाकरोत्॥७५॥एवंहिचक्रंसमवाप्यशंकराद्विष्णुस्तु
लिंगेलयमापतत्क्षणात्॥चक्रेश्वराद्दक्षिणतोमहेशलिंगेभवोंतर्गतिमायशंकरः
॥७६॥ ॥लक्ष्मीपति०॥ ॥हेमाधवत्वत्पुरतोनिरूपिताश्रीचक्रतीर्थेऽवपुण्य
सत्कथा॥यस्याःमात्राश्रवणेऽनवापीपुमान्विमुच्येतसमस्तकिल्बिषात्॥७७॥
॥ ॥इतिश्रीब्रह्मांडपुराणेमाहिष्टानमाहात्म्येचक्रतीर्थवर्णनंनामपंचदशोध्यायः॥ ॥मा
धवउवाच॥ ॥श्रीमल्लक्ष्मीपतेत्वन्मधुरवचोयोगतश्चक्रतीर्थमाहात्म्यंसर्वलोक
श्रवणसुखतरंतत्समाकर्ण्यचित्तं॥विश्रांतिंपापातापत्रयशमनकरीमाप्तवंहीमे
दुरापांस्वामिन्नयोपित्तणांकथयवरकथांपिप्पलेशस्यहृद्यां॥१॥ ॥लक्ष्मीप०
धन्योसिमाधवयतःश्रवणेकथायाश्चित्तंतवप्रसरतित्रिपुरांतकस्य॥जन्मांतरी
यसुकृतेनहिलभ्यतेवैशंभोर्हरस्यचकथाश्रवणेमनीषा॥२॥श्रीचक्र
तीर्थस्यचपिप्पलेशतीर्थस्यमध्येसकलाघहारी॥तीर्थत्रयंवच्मिशृणुष्वचादौ

ततोनदिष्यामिहिपिप्पलस्य ॥तत्तीर्थस्यकथांरम्यामादौशृणुमहामते॥यत्कथा
श्रवणान्नावैगोदानफलमाप्नुयात्॥४॥अत्रेतिहासंवक्ष्यामिश्रुतिसौख्यप्रदायकं॥
सर्वपापप्रशमनंश्रवणात्सर्वदेहिनां॥५॥कदाचिन्मंदरगिरौब्राह्मणानांवराश्रमान्॥
दृष्ट्वाशंभुःकामरूपीनिक्षाचारोबभूवह॥६॥गेहंगेहंप्रतिविशन्नयत्नवसुधरैः॥भि
क्षामयाचतस्त्रीभ्योयथासंभवमाहरात्॥७॥तद्भुततमंदृष्ट्वारूपंशंभोर्द्विजांगनाः
मुमुहुःसर्वशस्तावैभिक्षांदत्वातमन्वयुः॥८॥भिक्षांगृहीत्वाभगवान्स्वाश्रयंगंतुमुद्य
तः॥पश्चाद्दृशस्रुवतीर्दंरत्नालुगतंहरः॥९॥ततोविचारयामासकिमिदंसमुपस्थितं
शनैस्तंवारयामासभगवांश्चंद्रसेखरः॥१०॥एतस्मिन्नंतरेविप्राःसमस्ताश्रमवासिनः
क्रुद्धसहस्रशोदृष्ट्वास्त्रीसमूहंहरालुगं॥११॥बहुशोवार्यमाणास्ताःपतितासुतानुजैः
निवारयितुंशक्याद्दृष्ट्वाद्विजगणोभृशं॥१२॥ऊचिदित्वापरेशस्यशंभोरूपमुमापतेः
क्रुद्धःशशापशंभुंवैमायामोहितमानसः॥१३॥यद्वेषेनाबलासंघमस्माकंमोहयस्य
होतद्गंतेगलत्वाशुस्त्रीभ्यामोहप्रदायक॥१४॥एवंश्रुत्वाद्विजवचःशंभोर्लिंगंपपा
तवै॥भूमौजनेषुपस्यस्तुतद्भुतमिवाभवत्॥१५॥विस्मारयामतस्तद्वैवद्धलिंगमै
श्वरं॥तूष्णींदंडवदासाद्यद्युपलब्धमवापतत्॥१६॥पेषयामाससर्वान्येजनानसंतनि

ष्टुरं॥ततोहाहाकृतंसर्वंजिगत्स्थावरजंगमं॥१७॥ब्रह्मादिदेवताःसर्वाःतत्राजग्मुःसुरान्विताः॥अकालेकिमिदंजातंलोकप्रलयकारणं॥१८॥इतिचिंतातुराजाताःसर्वेसुरनरादयः॥शंकरावयवेनाहोलिंगरूपेणसंततं॥१९॥सर्वलोकक्षयंध्यातंतत्क्षणमिवाभवत्॥तत्रागताविरंचीमहेंद्रसूर्यदेवावशिष्टाश्चमुख्यमहानुभावाः॥विद्याधरकिन्नरमहोरगचारणाश्चचिंताप्लुतमनसःसकलाबभूवुः॥२०॥तस्यलिंगस्यमूलंवैपाताळादप्यधोगतं॥मूर्धानंसप्तलोकाख्यूर्ध्वमावरणातिगं॥२१॥ज्ञातुंतन्मस्तकंतत्रवैब्रह्माणंहिदिवौकसः॥प्रेषयामासुराधिकंमत्वासोपिजगामह॥२२॥भूरादिसप्तलोकांतंगत्वावात्तानदृष्टवान्॥लिंगांतंनदृशासोतताश्चिंतामवापह॥२३॥सोचिंतयन्मनस्येवंकिंवक्तव्यंमयाधुना॥सुरैःपृष्टेतिलिंगस्यविषयेतद्विसंकटं॥२४॥देवश्रेष्ठस्यचास्यानंवक्तुंयुक्तंनदृश्यते॥अथवासत्यवचनमदृष्टस्यचदर्शनं॥२५॥दोलायितंमनस्तस्यवक्तुंचेतःसुरांतिके॥मूढदृष्टइतिप्रोक्तैःसाक्ष्येहिविचारिते॥२६॥केनसाक्ष्यप्रियंदेयंचिंतावैसेमुपस्थिता॥तस्यामुपस्थितायांतुधातांधेनुमपस्यत॥२७॥ब्रह्मातामवरुह्येनोसंकटेपर्युपस्थिते॥असत्यमपिवक्तव्यंमितिधर्मःसनातनः॥२८॥सर्वश्रेष्ठत्वभंगस्यभीयाऽसत्येमयोदिते॥त्वंसाक्ष्यंदेहि

MEMORIAL

महावाक्येसत्यत्वप्रतिपादने॥२९॥शंभुमस्तकविज्ञानेपृष्टेदेवैश्चमांप्रति॥ऊहंवदिष्येदेवस्यमूर्द्धदृष्टश्चपूजितः॥३०॥तत्वलंवदसत्यंवैमत्सकाशेनाभिषोचितः॥दृष्टःशंकरमूर्द्धवैब्रह्मणापूजितोपिच॥३१॥इतिवयोदितेवाक्येमन्महत्संस्थिरंभवेत्॥तस्मात्कामदुघेसाक्ष्येदत्तसत्येपिसत्यवत्॥३२॥इतितस्यवचःश्रुत्वागोरभ्येत्यतत्क्षणाहवै॥ब्रह्मासावायथोपश्चात्कामधेनुःसमाययौ॥३३॥सुराब्रह्माणमूचुस्तेदृष्टःशंकरमस्तकः॥तथेतिब्रह्मणोवाक्यंश्रुत्वादेवाश्चसाक्षिणं॥३४॥पप्रच्छुरथवैब्रह्मासाक्षीगौरीत्युवाचह॥ततस्तेगांचपप्रच्छुःकथमित्यब्रवीच्चसा॥३५॥सत्यमित्येवतेश्रुत्वागोवचस्तेप्यचिंतयन्॥ज्ञानदृष्ट्यातुतैस्तत्तन्मसत्यमितिगोवचः॥३६॥शशंसुस्तेततस्तांगांमसत्यपरिभाषिणीं॥ऊचुस्तांतेधेनुकेत्वमदृष्टेहरमस्तके॥३७॥धात्रादृष्टइतिब्रूषेसत्यवाक्यविरोधिनी॥अपराधेनतेनत्वमपवित्राभविष्यसि॥३८॥इतिश्रुत्वासुरर्षिणांवाक्यंगोगोत्रजेयुतिः॥स्वापराधंपरिज्ञायजगामशरणंहरिं॥३९॥तुष्टावचजगंनाथंकरुणापारवारिधं॥सुरर्षिभिर्दत्तशापमुक्तयेहरमीश्वरं॥४०॥गौरुवाच॥ ॥नमामिदेवपदारविंदंसनंदनाद्यैरपिचिंतनीयं॥यच्चिंतनंसर्वजिनाघहारीसमस्तसौख्यैकनिदानभूतं॥४१॥यत्सारभूतंसकलंसकीर्तिं॥जगत्त्रयाद्योधवि

नाशकारी ।। ब्रह्मादिभिर्नंदितमादरेणतन्नोमिनारायणमप्रमेयं ।४२।।आर्तैकसं
त्राणपरायणेशकारुण्यसिंधोकमलाकलत्र ।। शापानलान्मोचयमामनाथमनाथ
बंधोशरणंप्रपन्नं ।। ४३ ।। कामधेनुरुवाचतंस्तोत्रंकृत्वाहरिरुवाचनं ।। कामधेनोप्रस
न्नोहंयाचयस्ववरंत्विति ।। ४४ ।। साप्रोवाचहरिंदेवंशापान्मोचयमामिति ।। ४५ ।।
ततःप्राहहरिस्तांवैधेनुकेशृणुमद्वचः ।। येनत्वंशापानिर्मुक्तायास्यस्यत्यंतमेध्यतां
।। ४६ ।। महांघ्रिजासर्वजनैकपावनीगोदावरीकल्मषराशिनाशिनी ।। चक्रेशयाम्येत
दुदक्तटेशुभेतत्रस्नततोयेकुरुमार्जनंशुभे ।। ४७ ।। संस्थाप्यलिंगंनिजनामधेयंतत्रस्नु
त्वाभवशापमुक्ता ।। ऋचाहरेवक्यिमतीवसौख्यंतथाकरोत्कामधुगप्यनिंदिता ।। ४८ ।।
गोतम्याउत्तरेतीरेचक्रतीर्थंतुदक्षिणे ।। कामधेनुःसमागत्यस्नात्वागोदावरीजले ।। ४९ ।।
लिंगंसंस्थाप्यनाम्नासंस्थाप्यसंपूज्यचतुष्टये ।। हरपार्श्वेजगतामीशंशापमोक्षायशंकरं ।
।। ५० ।। ।। कामधेनुरुवाच ।। ।। शंभोत्रिलोचनकपर्दिविराजमानगंगाप्रवाहजगदे
कनिदानभूत ।। श्रीपार्वतीरमणदेवजगन्निवासशापाद्विमोचयसदेवशरणागतां
मां ।। ५१ ।। विश्वस्यसर्गस्थितिसंयमांश्चजानंत्यकारणंदेवसमाननंति ।। संसारता

॥माधवउवाच॥ ॥स्वामिन्गुरोत्वन्मुखतोमयाश्रुतंगोतीर्थमाहात्म्यमतिवरोत्तमं
तेनातिविश्रांतिमवापमन्मनोलक्ष्मीपतेचांघ्रिरणंगतोह्यहं॥१॥अधुनाकथयस्वासु
तीर्थंपितृप्रमोदनं॥कथाश्रवणतश्चित्तंविश्रांतिमधिगच्छति॥२॥ ॥लक्ष्मीपतिरुवाच॥ २॥
शृणुष्वेमाधवसुधुद्वेपापनाशस्यकथांविचित्रं॥यस्यात्रपाठश्रवणाच्चपुंसांसंजायते
पुण्यमघक्षयश्च॥३॥ब्रह्मणोमानसःपुत्रोपुराऽत्रिःसमजायत॥ततोपराशिर्महिमागःसा
क्षात्सूर्यइवापरः॥४॥तस्याक्रियासूयास्यात्पतिव्रतपरायणा॥विनापतिंनजानातित्रै
लोक्येपिचपरं॥५॥एंपतीसनाशिलोतौतेपथेनपउत्तमं॥तयोरत्यंततपसाक्रत्यी
शुधनेश्वराः॥६॥बहुकुःसुप्रसन्नावेब्रह्मविष्णुमहेश्वराः॥ऊचुर्वांवृणीतांवैवरंस्वननसोस्ति
तं॥७॥ताऊचतुर्वरंब्रह्मंसुकाश्चेलधिश्वराः॥भवंतुचावयोःपुत्राभवंतोजगदीश्वराः॥८॥
तयोर्वाक्यंसमाकर्ण्यब्रह्मविष्णुमहेश्वराः॥तयोश्चसुव्रतांप्राप्यतपोबलगौरवात्
॥९॥ब्रह्मासिशंकरोऽभूद्वैब्रह्मचंद्ररवस्तथा॥हरिर्दत्तात्रेयरूपोबभूवजगतांपतिः॥१०॥दु
र्वासातपसिश्रेष्ठोदत्तआध्यात्मचिंतकः॥लोकाधिकारवक्तायचंद्रोलोकसुरावहः॥११॥
सप्तविंशतिरत्यासन्भार्यादक्षस्यकन्यकाः॥महागुणव्रतापीसोप्यविवेकवशंगतः॥१२॥

दृष्ट्वातारांगुरोर्भार्यांमन्मथाकुलमानसः॥तस्यतोगुरोर्भार्यामानयित्वगृहेशशी॥१३॥म
न्मथव्याकुलोरेमेबहुकालंतयासह॥बहुकालंतपःकृत्वागुरुःस्वगृहमाययौ॥१४॥नापश्य
त्तत्रवैतारांततश्चिंताकुलोऽभवत्॥शिष्यंप्रेष्यसमाहूयतांरचंद्रेहमथानयत्॥१५॥गुरो
र्गृहेसमागत्यतारांवैसुप्तवेसुतं॥माहात्मानंसुतंदृष्ट्वागुरुराहममेनिच॥१६॥चंद्रोप्याह ममेयंवै
विचारस्तुततोऽभवत्॥सुतायेविवदंतौतौब्रह्माणमधिजग्मतुः॥१७॥ब्रह्माप्याहपरीक्षेथेसा
क्षिणीजननिस्मृतां॥तांदृष्ट्वाऽऽगतोब्रह्माकश्यपायसुतामियुत॥१८॥सोवाचचंद्रस्यसुतंछ
लाच्चंद्रमायहीत्॥पुत्रंबुधंसलब्ध्वाऽत्रेःसंतोषंपरमंययौ॥१९॥गुरुतल्पगपापेनतेतेःरवि
जःसचंद्रजः॥ब्रह्माणंपरिपप्रच्छतदुष्कृतनिष्कृतिं॥२०॥तमाहसाधोत्वंकुरुगोदावरी
नदीं॥तत्रपापप्रणाशःस्यात्तवनास्त्यत्रसंशयः॥२१॥यद्दर्शनात्स्नानकराच्छिनाशोनृणांभवत्येव
नसंशयोऽत्र॥तांयाहिगोदांपरपुण्यकंदांविपापतामाप्स्यसितेनचंद्र॥२२॥यत्स्पर्शमात्रेणजना
लभंतेमहापदुष्कानुजाविशुद्धिं॥तांयाहिगोदांपरपुण्यकंदांविपापतामाप्स्यसितेनचंद्र॥२३॥
यःस्वच्छकःस्नानकृतांनराणांसंसारतापत्रयमुद्धिरेव॥तांयाहिगोदांपरपुण्यकंदांविपापतां
प्राप्स्यसितेनचंद्रे॥२४॥इत्याज्ञप्तोविधात्रासोचंद्रमारोहिणीपतिः॥चंद्रकोत्संप्रतस्थेगो
दांगंतुंसमुद्यतः॥२५॥ततश्चंद्रोवचनाद्विधातुर्गोदावरीस्नानसमुत्सुकोसौ॥विमानमारुह्य

पापि प्रगच्छन् स्वदोषतप्तो ननसि व्यचिंतयत्॥२५॥ नमाधपुण्यानुमेयराशिः प्रत्यक्षतामापयतो तिहृद्या॥ शंभोर्जटाजूटतटाग्रभर्तागोदापरोक्षासुहृदोभवित्री॥२७॥ एवंविचारपरश्चं द्रोमार्गेच्छन् शनैः शनैः॥ ददर्शतापसान्सप्तकश्यपादीन्महामुनीन्॥२८॥ तान्नमस्कृत्यजी वनंपुण्यराशिं निवेदितान्॥ प्रश्रयावनतोभूत्वा वचनंचेदमब्रवीत्॥२९॥ ॥चंद्रउवाच॥ स्वानिन्दुर्दोषदुष्टः पश्चात्तापेनसंवृतः॥ ब्रह्मास्यायाचगच्छामी महद्दोषोपशांतये॥३०॥ गं गांचैवत्रिलोक्यजननींसर्वलोकैर्नमस्कृतां॥ मकरंदायितांविष्णोः पदांभोजस्यसद्गतेः॥३१॥ यामितांशरणंदेवीं नानाहःखोपशांतये॥ भवंतोप्यनुमोदंतु इत्यादीष्टननानसः॥३२॥ तएवमस्तु नुनयस्तनचंद्रेणधीमता॥ तन्मुखेहितंतस्यसर्वपापनिवारकं॥३३॥ गौतमीयाहिभद्रंते सर्वदोषनिवारिणी॥ तेषांनिशम्यवचनंचंद्रस्तान्प्राहसादरं॥३४॥ कस्मिन्क्षेत्रेहिगंतव्यंगो दाकल्मषनाशिनी॥ इत्यंनिशम्यवचनंशशिनोमुनिसत्तमाः॥३५॥ गोदातीरेचसक्षेत्रंस्थलं चाहुस्तपस्विनः॥ शृणुचंद्रप्रवक्ष्यामिक्षेत्रंगोदावरीतटे॥ प्रतिष्ठानमितिक्षेत्रंतस्याप्युत्तरतः शशिन्॥ चक्रतीर्थमितिख्यातंयत्रचक्रेधराहरः॥३७॥ तद्दक्षिणेचगोतीर्थंगच्छत्तत्स्नानदक्षि ण॥ गोदावरीजलेस्नात्वालिंगंपापप्रनाशनं॥३८॥ संस्थाप्यपूजयित्वाचंपापान्मुक्तोभविष्य सी॥ इतितेषांवचःश्रुत्वा प्रतिष्ठानमगच्छत्शी॥३९॥ गौतीर्थंतुदक्षिणेदेशेस्नात्वागोदावरी

जले॥ पापप्रणाशनंलिंगंस्थापयित्वासुरेश्वरं॥४०॥ पूजयित्वातुविविधैरुपचारैर्म हामनाः॥ तुष्टावश्रीमहादेवंवचनैर्भक्तिसंयुतैः॥४१॥ ॥चंद्रउवाच॥ ॥शंभोशश शांकधृतशेखरदीनबंधोगंगाविराजितशिरः स्मरणैकसिंधो॥ त्रायस्वमांपरमपापि नमार्तबंधोबाणेकहीप्सितविभोभगवन्नमोस्तुते॥४२॥ त्रीक्षाधत्तोत्तमशरीरसमस्तवे दसंस्तूयमानप्रमथैकनाथ॥ सर्वेश्वरत्रिभुवनैकपवित्रमूर्तेपापंप्रनाशयविभोसुरवंद्यपा द॥४३॥ स्वाश्रयेरोपितसमस्तसुरार्तिनिर्विशानेकरक्षगजदैत्यपतेसुरेश॥ पापाब्धि मग्ननवलंबयमामनाथंहस्तेनलोकसुखदेनमहानुभाव॥४४॥ श्रुत्वास्तुतिंमहादेव स्वेपंचंद्रेणकल्पितां॥ लिंगादाविर्बभूवाशुशंभुःसद्भक्तवत्सलः॥४५॥ तंदृष्ट्वाशंकरंसा क्षाज्जगदानंदकारकं॥ शशिनानामसाष्टांगंपुलकांकितविग्रहः॥४६॥ प्रणनंतंशिवो दृष्ट्वासुनिष्टेत्यवाचह॥ ततःश्चंद्रःसमुत्थायस्वकल्मशेपनेदृढे॥४७॥ नानिधाय रचभालेसौशर्यैः सर्वजनेश्वरः॥ उवाचचंद्रभोचंद्रत्वंवरंवरयेतिच॥४८॥ तवस्तुत्याप्र सन्नोहंनाहंयंतवविद्यते॥ ततःप्रोवाचनंचंद्रोमनपापक्षयंकुरु॥४९॥ शंभुःप्राहक लानाथंमज्जगाज्जूटसंस्थिता॥ विष्णुपादाब्जसंभूतागंगाचत्रैलोक्यपावनी॥५०॥

यागोद्यानज्जलस्नातुर्महिंगस्थापितुस्तव ॥ नरकातिंकर्तुमधैव पापंनेक्ष्यमागतं
॥५१॥ इहानीरुपदेशछसुखिप्तवनिरंतरं ॥ तवपापप्रणाशंत्र ज्ञातस्तस्माच्चकारणा
त ॥५२॥ पापप्रणाशनंनामतीर्थंलोकेभविष्यति ॥३॥ स्मरिष्यंतियेभक्त्यादेवंपा
पप्रणाशनं ॥५३॥ पूजयिष्यंतियेनेषांसर्वपापक्षयोभवेत् ॥ सर्वस्वकामप्रा
प्तिश्चनात्रकार्याविचारणा ॥४४॥ इत्युक्त्वाजगनाभीशोलिंगेतद्वनिमायया
ततःप्रभृतितत्तीर्थंसर्वपापप्रणाशनं ॥४५॥ चक्रतीर्थाद्दक्षिणरुद्रगोतीर्थाद्दक्षि
णेरुद्रं ॥ पापप्रणाशनमितिप्रसिद्धंदेवसंयुतं ॥४६॥ लक्ष्मीप० ॥ हेमाध
वत्वांप्रतियन्मयोक्तंपापप्रणाशनाभिधतीर्थवर्यं ॥ कथांतदीयांश्रुण्वान्पठेद्वा
प्राप्नोतिकामान्सकलान्मनुष्यः ॥५७॥ ॥ इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानम
हात्म्येपापप्रणाशनमहिमावर्णनंनामसप्तदशोध्यायः ॥ ॥ ऋषयऊचुः ॥
सूतत्वन्मुखतःपापप्रणाशनकथाश्रुता ॥ पितृतीर्थस्यमाहात्म्यमिदानींव
क्तुमर्हसि ॥१॥ ॥ माधवउवाच ॥ स्वामिन्त्वदीयामरुवल्कनिर्गतांपाप
प्रणाशस्यकथांसुमंगलां ॥ आकर्ण्यलक्ष्मीपतिसद्गुरोमहाविश्रांतिमा

गान्ममानसंविभो ॥२॥ इदानींपितृतीर्थस्यमहात्म्यंवदसद्गुरो ॥ यदनुस्मरणा
च्चैवचित्तेसौख्यंप्रवर्धते ॥३॥ ॥ लक्ष्मीप० ॥ शृणुमाधवधीमन्यत्पृष्टोहंयं
वदिष्याम्यधुनाकथांशुभां ॥ पितृतीर्थविकाशिन्यांपुण्यात्रासिश्रीहरस
त्कथारसज्ञः ॥४॥ शृणुमाधवसद्बुद्धेकथामत्यंतशोभनां ॥ यांश्रुत्वामान
वानांहिमनस्तोषोभिजायते ॥५॥ अत्रेतिहासंवक्ष्यामिश्रुतिसौख्यप्रवर्ध
नं ॥ श्रवणादेवलोकानांसर्वपातकनाशनं ॥६॥ पूर्वंत्रिशंकुराजासृन्सूर्यवं
शोद्भवःस्मृतः ॥ प्रजापालनसंसक्तःस्ववर्णाचारचंचुरः ॥ अग्निहोत्रादिक
र्माणिकुर्वन्नत्यंतभक्तिमान् ॥ देवब्राह्मणपूजायामत्यंतंसादरःसुधीः ॥७
॥ वेदेशास्त्रेचसर्वेषांज्योतिष्टोमादिकर्मणि ॥ स्वर्गसाधनतांश्रुत्वास्वर्गे
चस्वरसंपदं ॥८॥ कदाचित्तस्यवांणीभूत्सर्वलोकप्रतिरेकिणी ॥ अनेनैवस्व
देहेनस्वर्गभोगैकगोचरः ॥९॥ वसिष्ठस्यगुरुंगत्वाविनयावनतमस्तकं
साष्टांगंप्रणिपत्याहस्वामिन्कुरुपतेगुरो ॥१०॥ अहंवांछाम्यनेनैवदेहेन
स्वर्गलोकगः ॥ नानाविधंस्वर्गसौख्यंनोवाछांपूरयस्वमे ॥११॥ नृपस्येत्थं
वचःश्रुत्वाब्रह्मर्षिराहनराधिपं ॥ नस्वर्गसौख्यमेतेनभोक्तुंदेहेनशक्यते

॥२३॥ देहांतरेणसाध्योवैस्वर्गोनात्रास्तिसंशयः॥कुरुयागमिमंदेहेत्यक्त्वादेहां
१५ तरेणवै॥२४॥स्वर्गंभुंक्ष्वमहाबुद्धेत्रास्त्वतत्वविदस्यहो॥एतद्देहःस्वर्गभो
गैर्मूर्खबुद्धिर्मिगांत्यज॥२५॥एतच्छ्रुत्वानृपस्तूष्णींमासरसंवत्सरंपुनः॥
वसिष्ठंस्वगुरुंराजानमेवार्थंहिपृष्टवान्॥२६॥प्रत्याख्यानःपुनश्चासौमु
निनापृथिवीपतिः॥एवंत्रिवारपृष्टेनमुनिनासनिराकृतः॥२७॥किंचित्सरो
षोःसोराजातत्पुत्रान्शानसंरभ्यचुक्रुधान्॥गत्वाप्रणम्यपप्रच्छतमेवार्थंमहीं
पतिः॥२८॥तेनमूर्च्छुस्तपोयोगचित्तयोगबलेनच॥किमत्राक्षंनदेहेनभो
क्तुंस्वर्गोपिनाक्ष्यते॥२९॥परंतुनातःप्रष्टव्यस्तदाज्ञावशगावयं॥अशक्त
मपिकुर्मोवैतपोयागबलेनच॥तेषांवचःसमाकर्ण्यराजानाहमंदधीः
पितानकुरुतेनजानातिकार्याकार्यविनिश्चयं॥३१॥इतिनद्वाक्यमाकर्ण्य
मुनिपुत्रारुषान्विताः॥शशापुत्रमहीनाथंगुर्वर्थंत्राकरंद्विजाः॥३२॥अनो
नैवस्वदेहेनत्वंचंडालोभवेतिच॥ततःस्वदेहंचंडालरूक्षणैरतिभीषणैः
॥३३॥यत्क्षंविलोक्यराजासोपरंदुःखमवापह॥काकरूष्णंलोहमयंबल १७
यंकृष्णचामसं॥३४॥मुक्तामालादिरहितंस्वर्णकंकणवर्जितं॥विलो

क्यदेहंपृथ्वीशःपरंदुःखमवापह॥३५॥ततोप्यहंकारयुतस्तद्वैरिक्रुषि
सत्तमं॥विश्वामित्रंजगामाशुतच्छापविनिवृत्तये॥३६॥विश्वामित्रंनृपोदृष्ट्वा
साष्टांगंप्रणनामतं॥चंडालरूक्षणोपेतंविश्वामित्रोविलोक्यतं॥३७॥चंडा
लदूरंगच्छेतिमुनिराहरुषान्वितः॥इत्यंतद्वचनंश्रुत्वाराजाप्रत्यब्रवीन्मुनिं॥३८
॥चंडालोनास्म्यहंराजात्रिशंकुरितिविश्रुतः॥तवकर्णपथंयातोभविष्यामिन
संशयः॥३९॥वसिष्ठपुत्रैःशप्तोहंचंडालत्वमुपागतः॥नृपंतथाविधंदृष्ट्वाक
रुणाविवशमानसः॥४०॥मुनिःपप्रच्छराजानंचंडालत्वस्यकारणं॥राजाप्याह
स्ववृत्तांतंयथावृत्तंमुनिंप्रति॥४१॥तच्छ्रुत्वाप्राहराजानंविश्वामित्रस्तपोनि
धिः॥पश्यराजन्नवहिनास्मिदानींममकौतुकं॥४२॥त्वांचंडालीयदेहेनतं
यागंकारयाम्यहं॥स्वर्गंचप्रापयाम्यद्यविमानेचसशोभनके॥यैःशप्तस्त्वं
चनैरेवत्वद्यागंकारयाम्यहं॥माचिंतांकुरुभोराजन्नत्रसंपत्तिमादर॥४४॥
इत्युक्तःसंपदंराजासतदानयदाहृतः मंडपंकारयामासर्त्विग्वर्णैर्वनुज्ञ
या॥४५॥विश्वामित्रोवसिष्ठस्यपुत्रानार्त्विज्यहेतवे॥आकारयामासनिजंश्रि
यंप्रेष्यसशिष्यकः॥४६॥तान्नत्वाप्राहभोविप्राविश्वामित्रगृहागतं॥यजमा

नंयाजयंतुभयंनःकौशिकाज्ञया।।३७॥इतिशिष्यवचःश्रुत्वावसिष्ठस्यज्ञातंस
ना:।।तेप्रोचुरंत्यर्त्विज्यंनकरिष्यामइत्युत।।३८।।ऋषिशिष्यऋषिंगत्वातंवृत्तां
वसिष्ठस्यतथावाक्यंचश्रुत्वाक्रुद्धःसकौशिकः।।३९।।राक्षसंगेधानयामासवसि
ष्ठस्यज्ञातंसुतान्।।४०।।अन्यानाकार्य्यामासब्राह्मणान्यागसिद्धये।४१।।सगायय्
वतेगीताःसत्वरंयागसिद्धये।।ऋषिसंघसमायुक्तश्चिंताकौशिकःकृतौ।
४२।।देवानावाहयामासयागेदेवानचाययुः।।कुद्धःप्रोवाचदेवांस्तकतोवागम्य
तेनवा।।४३।।आगताश्चेत्समीचीनंनचेच्छापंददाम्यहं।।इतिश्रुत्वासुराःसर्वेभी
तागत्वमुपाययुः।।४३।।तेप्रोचुरंत्यजहवि:कथंभोष्यामहेवयं।।सप्राहदेवा
नोदत्वाहविर्नोयदिभुज्यते।।४४।।शपामिवइतिश्रुत्वादेवाहविरशक्षयत्।।ज
ग्धाहविःसुराःस्वर्गंगंतुकामामहामुनिं।।४५।।पप्रछुःकौशिकंस्वामिन्यास्या
मस्त्रिदिवंप्रति।।सोप्याहनानिमंयूयंविमानरुंमहीपतिं।।४६।।कृत्वास्वर्गंनयं
न्याशुनात्रकार्याविचारणा।।एवंनिशम्यतद्वाक्यंप्रणम्याहुःसुरामुनिं।।
।।४७।।तद्वाक्याज्जाग्धमस्माभिर्निंद्यंहव्यंदयानिधे।।वेदशास्त्रविरुद्धंचय १८
ज्ञसर्वाद्विरोहणं।।४८।।क्षमस्ववेदमार्गाणांरक्षापकस्त्वंयतोह्यसि।।शि

ष्टैर्वेदविरुद्धंहिमकर्तव्यमितिनिश्चयः।।४९।।तस्मादिदंनयुक्तंचात्यजस्वर्गा
धिरोहणं।।इतिदेववचःश्रुत्वादेवानाहापयांत्रिति।।५०।।अपयानेपुदेवेषुवि
श्वामित्रोमहातपाः।।स्वतंत्रंस्वर्गमकरोन्नहोतस्मेत्रिशंकवे।।५१।।भूमौतस्य
प्रतिछायायत्रनलेकटंविदुः।।वसिष्ठोपिततःपुत्रशोकार्त्तःखिन्नमानसः।।
५२।।विवेकवानपिमुनिर्देहत्यागमसिंद्धयो।मेरोरधित्यकांगत्वातपोदेहमपा
नयत्।।५३।।ब्रह्महत्याभयाद्धीतोमेरुःस्वीयामुपत्यकां। तूष्णीसमानामकरोत्
तत्रनदेहआपतत् ५४ तूष्णीरुद्गदवोन्नरुंजननःस्वांतंविचारयत्।।सर्वस्मिन्न
स्वदेहत्यागेकरेदुःखंकिमेशोकस्यकारणं।।५५।।विवेकमवलं
ंबनिस्वमाश्रममगान्मुनिः।।तत्रगत्वातपस्तेपेवर्षमात्रंततोमुनिः।।५६।।
स्वाश्रमंक्रीडनोपेतंपरितोमुनिबालकान्।। तत्रगत्वातपस्तेपेवर्षमात्रं
ततोमुनिः।।५६।।स्वाश्रमंक्रीडनोपेतंपरितोमुनिबालकान्।। संतानाभा
वमालोक्यस्वस्यातप्यदसोमुनिः।। ५७।। मायाव्यासःपुनश्चासोदेहत्यागे
मतिंदधौ।। प्राच्यांदिग्यामगाधायांत्यक्तुकामानिजांतनुं।।५८।।वल्गुरीतनुगि
र्बध्वाप्रापतद्वहुलोदके।।नदीविचारयामासदेहत्यागेनयथाभवेत्।।५९।।
ब्रह्मपुत्रस्यचतथाकर्त्तव्यंनात्रसंशयः।। ततःसानदीस्वीयजलावर्त्तेरनेक
धा।।६०।।तत्याशान्मुमुचेसर्वान्स्वांगिनीःस्तदनुत्सृजन्।। ततोवसिष्ठः
स्वदृष्ट्वाजीवनंदैवयोगतः। ६१। पुनर्विवेकमाश्रित्यजगामस्वाश्रमंमुनः।।
गमनावसरेतस्यस्नुषाज्येष्ठापितुर्गृहात्।।६२।।अंतर्वत्नीप्रसूत्यर्थंगच्छती

स्वगृहंप्रति॥ इदमस्यशिरोशुल्मव्याधेदघोषंचकारह॥६३॥श्रुत्वाचेदध्वनिंविप्रो
१०. वसिष्ठोविजनेवने॥रक्षःभिंतामविष्टश्चितामापदुरत्ययां॥६४॥वेदध्वनिमा
यंकोवाकुरुतेविजनेवने॥तावद्ददर्शपश्चान्तुस्नुषांगर्भवतींनिजां॥६५॥विश्वा
मित्रंपितोवाराक्षसोमद्वधोद्यतः॥इतिचिंताकुलोयावच्छ्रुतदिशव्यलोक
यत्॥६६॥ततस्तांपरिपप्रच्छकोधानेवेदमब्रवी॥सोवाचतवपोत्रोयम
र्धांतममगर्भकः॥६७॥इतितद्वाक्यमाकर्ण्यविश्रांतस्तुष्टमानसः॥शांतान
स्थैर्यमाकर्ण्यविश्रांतिंपरमांयया॥६८॥सावसिष्ठाश्रमंगत्वारुषुवेसुतमु
त्तमं॥तंदृष्ट्वाप्रापसंतोषंवसिष्ठःसूर्यवर्चसं॥६९॥जातकर्मादिसंस्कारांश्च
कारपरयामुदा॥सवर्धमानोमेनेवासिष्ठंपितरंस्वकं॥७०॥तच्छ्रुत्वारुदती
प्राहतन्मातातनयंस्वकं॥बालनायंतुतातस्तेनवचैषपितामह॥७१॥मज्जन्मो
त्तरदोषाद्वैत्वत्तोराक्षसेहतः॥ततोवसिष्ठःप्राहैवंपराशरइतिस्मृतः॥७२॥
राक्षसेहतमाकर्ण्यपितरंरक्षसांवधे॥उद्यतोराक्षसंसत्रमकरोद्ब्राह्मणोः
सहः॥७३॥बहवस्तेनिहतारक्षसाःमत्रकारिणा॥तच्छ्रुत्वारक्षसांता
नःपोलस्त्योवारुमायया॥७४॥पराशरस्तुपोलस्त्यंदृष्ट्वापूजयदादृतः॥
तंपप्रच्छांतिनम्रस्तुनदागमनकारणं॥७५॥सऊवाचमहासत्रेयाचको
ऽहंसमागतः॥मत्पुत्रसंहारकरंसत्रंवैपरिपूर्यतां॥७६॥पराशरोपितच्छ्रु ११.
त्वासत्रंपूर्णंचकारह॥पराशरस्यस्ववचोनिष्ठतामवधार्यसः॥७७॥पोल
स्त्योवरमसेचददौव्यासस्यतांतनः॥ततःपराशरःश्रुत्वापितॄन्रक्षोनिपूर्णि

तान्॥७८॥तदुद्धारमनाःसोथपप्रच्छस्वपितामहं॥वसिष्ठोपितगोत्रेथंप
राशरवचःशृणु॥७९॥गोतमांगच्छभद्रंतेप्रतिष्ठानेसपुण्यदां॥पाप
प्रणाशनायास्येगोतम्यांस्नाहितत्वतः॥८०॥कृतनित्यक्रियःपिंडदानंकुरु
यथाविधि॥त्वत्पितुश्चपितॄणांमुद्देशेनचसर्वशः॥८१॥पश्यमाहात्म्य
मतुलंगोतम्याःपितृयज्ञवत्॥पित्रीशंतत्रसंस्थाप्यलिंगंसंस्थाप्ययत्नतः
॥८२॥त्वंद्रक्ष्यसिविमानस्थानूस्वपितॄन्नात्रसंशयः॥इत्थंश्रुत्वाततोवा
क्यंवसिष्ठस्यजगामसः॥८३॥प्रतिष्ठानेसगोतम्यांदृष्ट्वापापप्रणाशनं॥
तद्भक्षेणेचगोदायांस्नात्वापित्रीशसंज्ञितं॥८४॥लिंगंसंस्थाप्यविधिवत्
पूजयित्वास्वशक्तितः॥पिंडदानंसमकरोत्पितॄनुद्दिश्यसर्वशः॥८५॥गोत
म्यांपिंडदानेनस्वपितॄन्सुविमानगान्॥अपश्यत्सूर्यसंकाशान्दिव्यमाल्या
नुलेपनान्॥८६॥पराशरंपितॄदृष्ट्वाप्रणनामसदंडवत्॥ततस्तेपिचसंतुष्टा
स्तमाशीर्भिरतोषयन्॥८७॥गोपराशरपुत्राग्र्यचिरंजीवसुरवीभव॥येन
त्वयावयंतातनारिनादुरितार्णवात्॥८८॥यानारायणपादपद्ममकरंदीभूत
राजज्जलागोदातत्तटपिंडदानतस्त्वतिस्वच्छांबुसंतर्पणैः॥८९॥दिव्यब्राह्मण
तर्पणैरपिमहापूजाभिरुद्धारितायामःशंकरमंदिरंतवशिरोपुण्यप्रभावाद्व
यं॥९०॥ ॥श्रीलक्ष्मीपति॥ ततोमाधवनेसर्वेहरस्मरणपूर्वकं॥गताःकै
लासभवनंसर्वेषांतत्रपश्यतां॥९१॥तस्माच्चदिनमारभ्यपितृतीर्थंनदुच्यते
यत्रस्नानाद्दानतोवापितृणांतर्पणाद्दर्पणादपि॥९२॥पितृन्नामुद्दिश्यतोयं

आत्मानंचापिपातकात् सार्वान्कामानवाप्नोतिशिवलोकंसगच्छति॥१३॥
२० योमाधवेमांपितृतीर्थसत्कथांपठेन्नरोवेश्रृण्यादपिक्वचित्॥सर्वान्कामा
नसमवाप्यमानवःशंभोःपरंस्थानमुपैतिमानवः॥१४॥ ॥इतिश्रीप्रतिष्ठान
महात्म्येपितृतीर्थमहिमावर्णनंनामाष्टादशोध्यायः॥ ॥ऋषयऊचुः॥अपू
र्वंपितृतीर्थस्यकथान्वन्मुखतःश्रुता॥इदानींपिप्पलेशस्यकथांकथयवि
स्तरात्॥१॥ ॥सूतउ०॥यथाभवद्भिःपरिपृच्छतेयंतथैवपूर्वंवसुमाधवे
न॥पृष्टस्तुलक्ष्मीपतिराहयत्तेशृण्वंतुविख्यातमितिप्रशस्तं॥२॥पितृतीर्थस्य
महात्म्यंश्रुत्वामाधवसंज्ञकः॥पप्रच्छपिप्पलेशस्यकथांलक्ष्मीपतिंप्रति३॥
॥माधवउ०॥॥श्रीलक्ष्मीपतिसंज्ञकगुरुवरानंदैकमूर्त्तेप्रभोत्वांयानोस्मि
शरण्यवर्यशरणत्वंमेदयालुर्भव॥उक्तंपैतृकतीर्थमछमछप्रालोकोपका
रायवेस्वामिंस्तद्वदपिप्पलंत्वमधुनाश्रुत्वासकविश्रांतिदं४॥ लक्ष्मीपति
रु०॥साधोमाधवसत्कथामृतरसाभिज्ञत्वयायाकथापृष्टासर्वजनाघसं
घनिचयध्वांतापहांचंद्रिका॥श्रीमत्पिप्पलनाथसंज्ञपुरहन्माहात्म्यसु
धांदिनांतरभक्त्याश्रृण्वसन्मतेत्वमधुनाहंत्वांवदामिस्फुटं॥५॥एवंनार
दपृष्ठेवैब्रह्मापिप्पलसत्कथां॥श्रीनारदंप्रतिप्राहश्रवणात्पापनाशि
नीं॥६॥पिप्पलंतीर्थमाख्यातंचक्रतीर्थात्तुदक्षिणे॥पूर्वंमहेश्वरोदेव
श्चक्रमापयतोहरिः॥७॥यत्रविष्णुःस्वयंस्थित्वाचक्रार्थंशंकरंप्रभुं॥पू
जयामासतत्तीर्थंचक्रतीर्थमुदाहृतं॥८॥यत्रप्रीतोभवद्विष्णोःशंभुस्त

LIBRARY

२०

त्सिप्पलेविदुः॥ महिमानंयस्यवक्तुनशक्नोत्यहिनायकः॥९॥पूर्वंमहेश्वरः
पश्चात्पिप्पलेशोयथाभवत्॥शृणुनारदतद्भक्त्यावदामियथातथं॥१०
दधीचिरितिविख्यातोऋषिरासीद्गुणाधिकः॥तस्यभार्यामहाप्राज्ञाकु
लीनाचपतिव्रता॥११॥ लोपामुद्रेतिविख्यातास्वसातस्या गर्भस्थि
नी॥ नाम्नाभूमंडलेख्यातावडवापिचकीर्त्तिता॥१२॥दधीचःसांप्रिया
नित्यंभर्तृसेवनतत्परा॥ दधीचिरग्निमान्नित्यंगार्हपत्यधर्मपरायणः॥स्व
कलत्ररतःशांतःकुटुंबपरिपालकः॥ तस्यप्रभावात्तद्देशेनारयोदैत्य
दानवाः॥१४॥अजमुनिश्चार्दूलयत्रागत्यस्यस्थाश्रमः॥तत्रदेवाःसमा
जग्मुरुद्रादित्यास्तथाश्विनौ॥१५॥इंद्रोविष्णुर्यमोऽग्निश्चजित्वादैत्यान्रणे
गणे॥जयिनोज्ञातहर्षाश्चयुताःसर्वेमरुद्गणैः॥१६॥दधीचिमुनिशार्दूलं
दृष्ट्वानेमुःसुरोत्तमाः॥दधीचिर्जातहर्षश्चसुरान्संपूजयन्पृथक्॥१७॥
उपचारान्ततश्चक्रेसुरेभ्योभार्ययासह॥पप्रच्छकुशलंतेनकथाश्चकु
शलाअपि॥दधीचिस्तैकृतंदेवाभार्ययासुखसंस्थितं॥दृष्ट्वानमब्रुवंदेवा
विनयान्नम्रकंधराः॥१९॥किंकिंहिदुर्लभंलोकेत्रयेस्माकंभविष्यति
त्वादृशासत्कृताये वैबाधवुःकल्मषादपाः॥२०॥एतदेवपरंपुंसांजीवतां

मुनिसत्तमाः॥नार्थपूर्तिर्भूतदयादर्शनंचमवाद्दशं॥२५॥यत्नेहादुच्यतेस्माभि
रवधार्यतन्मुने॥जित्वादैत्यानिहप्राप्तान्गृहत्वाराक्षसंगवान्॥२६॥जितास्माः
सःखिनोब्रह्मन्नुत्स्वयिदृष्टेविशोषनः॥नायुधैःफलमस्माकंयोद्धुंनैवक्षमावयं
२३॥स्थाप्यदेशंनपश्यामः आयुधानांनसंशयः॥स्वर्गेसुरद्विषोज्ञात्वाआयुधा
निहरंतिच॥२४॥नयंतिचायुधानीतिगछंत्येवरसातलं॥तस्मात्तवाश्रमे
पुण्येरक्ष्यंतेस्त्राणिमानद॥२५॥नैवात्रकिंचिद्भयमस्तिविप्रनैवाक्षरेभ्योनव
राक्षसेभ्यः॥त्वदाज्ञयारक्षितपुण्यदेशंनविघ्नेत्वत्तपसारतमानं॥२६॥जितार
योब्रह्मविदांवरिष्ठःपूर्वंवयंवैहतदैत्यसंघाः॥अस्वस्थरूपाभरभूतेःकृतार्थैःरक्षा
प्यस्थात्वत्प्रसादेनविप्र॥२७॥दिव्यान्भोगान्कामिनीभिःसमेतान्देवोद्याने
नंदनेसंभजामः॥ततोयामकृतकार्याःसहेंद्राःस्वंस्वंस्थानंचायुधानांचरक्षा
॥२८॥त्वयाकार्याजायतांत्वत्प्रसादःसमर्थस्त्वंधारणेरक्षणेच॥तद्वाक्य
माकर्ण्यदधीचिरेववाक्यंजगौविबुधानेवमस्तु॥२९॥निवार्यमाणःप्रि
यया३लिखत्याकिंदेवकार्येणविरुद्धकारिणा॥येज्ञानदग्धाःपरमार्थ
निष्ठाःसंसारवेष्टासक्तानुरागाः॥३०॥तेषांपरार्थव्यसनेनकिंमुनेयेनात्र २१
वामुत्रसुखंनकिंचित्॥देवद्विषोद्वेषमनुप्रयांतितत्तेस्थानंविप्रवर्यश्रृणु

घ॥३१॥नष्टेभ्रष्टेचायुधानांमुनीशाकुर्यंतिदेवारिपवस्तेभवंति॥तस्मा
न्नेदंवेदविदांवरिष्ठयुक्तंद्रव्यंपरकीममतत्वं॥३२॥तावन्मैत्रीसुहृद्भावभक्ता
यन्नष्टेहृतेवारिवस्तेभवंति॥नचेन्निश्चक्तिर्द्रव्यदानेपुरस्तेदातव्यमेवार्थि
नेकिंविचार्यं॥३३॥नोचेत्संतःपरकार्याणिकुर्युर्वाग्भिर्मनोभिःकृतिभि
स्तथैव॥पित्तक्रमादागतंप्राणिनोचयद्बाह्यंवैभवादर्जितंच॥३४॥रम्यं
द्रव्यंदेहभाजामथान्यन्मृत्युः साक्षान्निरयोवादुरंतः॥तस्मादन्योनाधमःक
श्चिदस्तियोन्यद्वित्तस्वाम्यलेशेनगर्वी॥३५॥परस्वसंधारणमेनदेवसद्भि
र्निरस्तंत्यनकांतसंघः॥एवप्रियायावचनंसविप्रोनिशम्यभार्यामिदमाहस्म
शुं॥३६॥एवंसुराणामनुमन्यभद्रेनेतीतिवाक्यंनसुखंममेति॥श्रुत्वेरितंप
त्युरिहप्रियार्यादेवंविनान्यंननृणांसमर्थं॥तूष्णींस्थितायांसुरसत्तमास्तेसं
रुह्याप्यचास्त्राण्यतिदीप्तिमंति॥नत्वामुनींद्रंययुरेवलोकान्दैत्यद्विषोजयि
नस्तत्कृतार्थाः॥३७॥गतेषुदेवेषुगिप्रवीरोदृष्टेवरद्वार्यथाधर्मयुक्तः॥
गतेचकालेऽतिविप्रकीर्णेदेवेमनेसंख्ययावंसहस्व॥३९॥नेतेसुरा
श्चायुधानांस्थितानांवर्त्तोकोचिद्वापिचक्रुः॥दधीचिरप्याहृगाभस्तिनीं
शुभेदेवारयामांहिषेनीहलोके॥४०॥नेतेसुरानेतुकामाभवंतिस्वरुग

पिनस्त्वत्रवदस्त्रयुक्तं॥ साचाहकांतंविनयादुक्तमेवत्वंजानीषेनाथयदत्रयुक्तं
॥४१॥देत्याहरिष्यंतिमहाप्रसिद्धास्तपोयुक्ताबलिनश्चायुधानि॥तदस्त्रर
क्षार्थमिदंसचक्रेमंत्रैश्चसंशाल्यजलैःऋपुण्यैः॥४२॥तद्वारिसर्वास्त्रमयं
ऋपुण्यंतेजोमयंचापपोदधीचिः॥निर्वीर्यरूपाणितदायुधानिक्षयंजगमु
ऋगुत्राःकालयोगात्॥ऋराःसमागत्यदधीचिमाहुर्महाभयंचागतंशात्रवा
णां॥दस्त्रचास्त्राणिमुनिप्रवीरयानित्वदंतेनिहितानिदेवैः॥४४॥दधीचिर
प्याहबकारिभीत्याद्यनागत्याभवतांचाचिरेण॥अस्त्राणिपीतानिममास्थि
संरुध्यन्यत्रास्तियुक्तंममनद्दंतु॥४५॥आकर्ण्यदेयामुनिनेरितंनोधिङ्मू
ढनोधिग्धिगित्यंवदंतः॥विनिश्वसंतःकरुणंमुनितंसर्वीक्षयंतोजगदुःप्र
श्रयेण॥४६॥अस्त्राणिदेहीतिचवक्तुमेनच्छक्यंनवैवाग्वदतिह्यबद्धं॥
विनाचतेःपरिभूपेमनित्यंदुष्टारयःक्षयामामुनीश॥४७॥नमर्त्यलो
केनतलेननाकेवासःसुराणांभवितास्यतान्॥त्वंविप्रवर्यस्तपसाचैव
युक्तोनान्यद्वक्तुंयुज्यतेतेपुरस्तात्॥४८॥इतीरितंदेवगणैःसविप्रश्चआ
कर्ण्यतानाहनिर्विण्णचेताः॥कुर्वंतुसर्वेत्रिदशायथेष्टंमदस्थिभिःस्वानि
तान्यायुधानि॥४९॥निशम्यशक्रोमुनिभाषितंतदकंपनोतस्तमनामनस्वी

यद्देवदिष्टंमुनिवर्यतन्नोभवत्वहोब्राह्मणदेहिकानि॥५०॥अथोबभा
षेसमहानुभावानमेःशिलाषोःस्तिशरीरकस्य॥विप्रस्तदेवाहमदस्थिभू
ताण्यस्त्राणिगृण्हंतुनसंशयोत्र॥५१॥देवास्तमप्याहुरनेनकिंनोह्य
स्थेर्विनास्त्रीत्वमामाःस्मरेंद्राः॥पुनस्तदाचाहमुनिप्रवीरस्त्यक्ष्येजीवान्दे
हिन्यौगयुक्तः॥५२॥अस्त्राणिकुर्वंतुममास्थिभूतान्यनुत्तमान्युत्तमरूपवंति
कुरुध्वचेत्याहुरदीनसत्त्वादधीचिमत्यद्भुतमग्निकल्पं॥५३॥तदाचतस्य
प्रियमीरयंतीनसंशिधौप्रीतिमतीतदानीं॥तेचापिदेवास्तामदृष्टेवशीघ्रं
तस्याशीसातंसमूचुःकुरुष्व॥५४॥तत्याजजीवान्दुस्त्यजान्प्रीतियुक्तो
यथास्त्रबंदेहमिमंजुषध्वं॥मदस्थिभिःप्रीतिमंतोभवंतुसुराःसर्वेकिंबुदे
हेनकार्यं॥५५॥इत्युक्त्वासोबद्धपद्मासनरुग्स्वनासाग्रन्यस्तदृष्टिःप्र
सन्नः॥वायुंसवन्हिमध्यमाद्यातयोगान्नीत्वाशनैर्देहमाकाशगर्भं॥
५६॥यदप्रमेयंपरमंयद्ब्रह्मदयद्ब्रह्मस्वरूपंयदुपासितव्यं॥तत्रैवनि
न्येस्वधियंमहात्मासायुज्यतांब्रह्मणासोजगाम॥५७॥निर्जीवनांप्रा
तमवेक्ष्यदेवाःकलेवरंतस्यसुराश्चसर्वे॥त्वष्टारमभ्यूचुरतित्वरंतःकु
रुष्वचास्त्राणिबहूनिसद्यः॥५८॥शचीपतिप्राहकथंतुकार्यंकलेवरंत्वस्य

हितंकरेंद्राः॥विरोमिकर्त्तुंदारुवच्चाक्षमोहंविदार्यनेत्रेरायुधान्युत्तमा
नि॥६९॥तदस्थिभूतानिकरोमिसद्यस्ततोदेवागांसमूचुस्त्वरंतश्चक्रं
मुरुंवः क्रियतेहितार्थंगावोदेवैरायुधार्थंशरीरेण॥६०॥दधीचिदेहंप्रवि
दार्यशुद्धमस्थीशुद्धानिप्रयच्छाद्य॥तदेववाक्यंचतथेवचक्रुःसंछे
द्यचास्थीनिददुःसुराणां॥६१॥अवाप्यचास्थीनिमुदंततायुस्त्वरंणते
जग्मुरदीनसत्वाःस्वंस्वंनिकेतंपरिपूर्णकामागावोपिजग्मुःकृतदेव
कार्याः॥६२॥स्वमालयंनिर्व्यथमानचित्तानतश्चिरादेत्यदधीचिभार्या॥
पतिव्रताशीलवतीसुगात्राभूतप्रियाबालगर्भाचरंती॥६३॥त्वरंगृहीत्वा
करुणांवारिपूर्णंसंतप्तचित्तापथिशुष्ककंठा॥भ्रष्टांविभूषांपतितांध
रायांपपातहस्ताकरभूषणेच॥६४॥नेत्रंतदादक्षिणमुत्फुलास
हाकिंभविष्यत्यचिरेणकष्टं॥मत्संतरेणैवविचिंतयंतीश्रमान्विता
पुष्पफलैःसमेत्य॥६५॥आगंतींश्चभर्त्तामथाश्रमेचसंद्रष्टुकामा
यजगामशीघ्रं॥आगच्छतींप्राचिथेयीतदानींनिवारयामासरथो
त्कपाताः॥६६॥सासंभ्रमादागताचाश्रमंतंनचापश्यत्तत्रभर्त्तारम २३
पापस्यलेशोपिद्विजसोत्तम॥तस्मान्मतीर्थमेतद्धिकृष्णतीर्थमितिस्मृतं॥११॥मत्पादसंभवजलातिबलाघहंत्रीगोदावरीभुवनमंगलनामधेया॥ सत्रापिमत्कृतमिदंबहुपुण्यकारिश्रीकृष्णतीर्थमतुलंबहुकल्मषघ्न॥१२॥तत्रस्नात्वानुदिवसंगोदोदकृतटशालिनी॥वृंदावनेसुखंतिष्ठयदृच्छालाभतोषितः॥ १३॥सच्चिदानंदरूपंमांमेकंध्यायन्ननन्यधीः॥प्राप्स्यसेब्रह्मनिर्वाणंयत्रगत्वानशोचसि॥१४॥एवंश्रीकृष्णवचनंश्रुत्वासोविप्रमंगलः॥आनंदनिर्भरोजातःश्रीकृष्णंप्रणनामह॥१५॥ततोजांबवतीदेवीसाक्षाल्लक्ष्मीहरिप्रियाअस्मोषाकमलामंबादारिद्र्यापगमेच्छया॥१६॥हेमातःकमलेजगच्चयगुरोःकृष्णस्यहृद्यांगनेकारुण्येकनिधेकृपांकुरुमहादारिद्र्यसंहारके॥ सर्वाभीप्सितदास्वभक्तभजनासक्तांतराणांनृणांमाधेत्वांशरणागतोस्मिजगदानंदेप्रसीदाशुभां॥१७॥तस्येवंस्तवमेनंश्रुत्वाकमलाप्राहतंद्विजभुक्तिस्तेमत्प्रसादेनमुक्तिःकृष्णप्रसादतः॥१८॥अस्मिन्मेकमलातीर्थेस्नानस्याहोभविष्यति॥इत्युक्त्वाकमलाकृष्णोतत्रैवांतरधीयत॥१९॥ततस्तंकालमारभ्यप्रातर्मध्यान्हयोस्तदा॥श्रीकृष्णकमलातीर्थद्वयेस्नात्वातियत्नतः॥२०॥श्रीकृष्णकमलानित्यध्यानतत्परमानसः यावज्जीवपराभुक्तिमंतेमुक्तिमवापसः॥२१॥अत्रतीर्थद्वयेस्नातियेचतत्पूजनेरताः

तेभुक्तिमुक्तिभाजोवैभवंत्येवनसंशयः॥२२॥ ॥श्रीलक्ष्मी॰॥ श्रीकृष्णतीर्थस्य
कथांसकलमंगलांशृण्वंतिहेमाधवयेपठंति॥श्रीकृष्णगोष्ठीषुविषक्तमानसास्ते
भुक्तिंमुक्तिंहृदयमाप्नुवंतिवै॥२३॥ ॥इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमहात्म्ये
श्रीकृष्णकमलातीर्थहृदयमहिमावर्णनंनामत्रयोविंशोध्यायः॥ ऋषयऊचुः
सूतत्वन्मुखतःकृष्णकमलातीर्थसत्कथा॥श्रुतेदानींवदस्वत्वंदोलातीर्थक
थांशुभां॥१॥एवंहिलक्ष्मीपतिनामकोगुरुःशिष्येणवेमाधवशर्मणार्थितः॥दो
लेशासंज्ञस्यमहेशितुःकथांयामाहतांवःप्रवदामिभोद्विजाः॥२॥माधवउ-
॥श्रीलक्ष्मीपतिसंज्ञदेशिकवरत्वद्रूपंकेरुहारसंजातामलकृष्णतीर्थकम
लारव्यानश्रवाल्लादिनां॥स्वामिन्ब्रूह्यधुनाकथारसवतामस्माकमत्यादरा
द्दोलातीर्थकथांसरंवेकनिलयांशिष्येककल्पद्रुम॥३॥ लक्ष्मीप॰॥दोला
तीर्थस्यमाहात्म्यंशृणुमाधवयत्नतः॥अत्यादरात्प्रवक्ष्यामिश्रोतृसंतोषदाय
कं॥४॥कृष्णतीर्थादक्षिणस्यांकमलातीर्थमुच्यते॥ततोदक्षिणतोदोला
तीर्थंगुह्यंमनीषिभिः॥५॥तन्निमित्तंप्रवक्ष्यामिप्रतिष्ठानगतंतव॥पुरा
प्रतिष्ठानपुरेधर्मशर्माद्विजोत्तमः॥६॥स्वधर्मनिरतःशांतोधनीचबहु
पोषकः॥तस्यैकएवपुत्रोभूद्धर्मवर्माद्विजाग्रणीः॥७॥परंतुसकुरूपो ४७
भूज्जन्मांतरकृतांहसा॥वेदवेदांगतत्वज्ञःसर्वकर्मप्रवर्त्तकः॥८॥त
स्मिन्नाधनलोभेनधनिनःकस्यचित्सुता॥सास्यकुरूपापुत्रायजायावे

विनियोजिता॥९॥धर्मवर्माततोदृष्ट्वाजायांस्वीयांकुरूपिणीं॥अदर्शंस्वकु
रूपंचदृष्ट्वादुःखमवाप्नुयात्॥१०॥विद्यावित्तेधनित्वेचयौवनेभोगसंचये
सर्वस्मिन्विद्यमानेपिरूपचिंतातुरोभवत्॥ततोविचारयामासधर्मवर्मा
स्वमानसे॥सत्कुलोत्पत्तिविप्रोघंयौवनान्नाढ्यसद्मसु॥१२॥विद्यमानेषु
हादेवकथंजातोकुरूपता॥तस्मात्कलेचशीघ्रेचरूपध्वंसकरेत्रके १३
सदनवस्त्रभोगेचविद्यारोग्येदीर्घजीविते॥भोगेयोगेवियोगेचदेवमेवात्र
कारणं॥१४॥येनस्नातानेचगोदापवित्रायेनश्रीमान्हरिराधितोना॥शर्वोवा
नागाधिपःपार्वतीवासोसद्रूपाद्याश्रयःस्यात्कथंवै॥१५॥तस्माद्दृढंशर्वमनन्यचि
त्तःसंसेवयिष्यामिजगन्निवासं॥योषासमेतस्यसरूपतामेतथाकरिष्याम्यधु
नाल्पकायं॥१६॥एवंसंचिंत्यमनसिकल्पयित्वानिजाश्रमं॥प्रतिष्ठानादु
त्तरतस्तत्रावरुह्यसन्मतिः॥१७॥दोलांस्वर्णमयींकृत्वांतत्रावरुह्याप्यनामी
दं॥बाणलिंगस्यैवपूजामारभद्भक्तितत्परः॥१८॥कमलातीर्थयाम्येवेरु
द्रदोलागतंशिवं॥गोदावर्यांस्नापयित्वाषोडशैरुपचारकैः॥१९॥प्रपूजयति
देवेशंधर्मवर्माद्विजोत्तमः॥पुनश्चस्वाश्रमंरम्यंदोलासंस्थंसदाशिवं॥२०॥
पूजयञ्जदेवेशंश्रीशंकरमुमापतिं॥अहोरात्रंशिवध्यानपरोनाहारवर्जितः
२१॥एवंतस्यव्यतिक्रांतेकालेषण्माससम्मिते॥शिवस्तत्तत्सायुष्टालिं
गरूपीमहेश्वरः॥२२॥आविर्बभूवभगवान्दोलेशइतिविश्रुतः॥संतुष्टभ

गवंतंचधर्मवर्माभिधोद्विजः॥२३॥शार्विभूतंमहेशंचदृष्ट्वासद्विजसत्तमः॥
तुष्टावपरयाभक्त्याधर्मवर्माद्विजाग्रणी॥२४॥अत्यंतभक्तिसंयुक्तैर्वचनैः॥
कामलैःशुभैः॥ ॥द्विजउवाच॥ ॥देवदेवमहादेवविभूतिविभूषितांगगंगाप्रवाहस्फ
विभूषितसत्कपर्दिन्त्रैलोक्यजिन्मदनदाहकवन्हिशोभिभालस्थलीयंनय
नानुपमेयकांते॥२५॥त्रैलोक्यनाथजगतांशोशिखंडेभालस्थगर्क्षितिप्रल
यकारणदेवदेव॥सर्वामरस्तुतजगत्त्रयगीतकीर्त्तेत्वामाश्रितोस्मिभुवनश
यनशीलदेव॥२६॥सद्रूपतांवितरदेवविरूपभीतस्त्वायाम्यहंदेवशरणंभुव
नैकबंधो॥नानाकृतिप्रविलसज्जगदेककारी॥गुयान्मृगीनिपमितुःकिमश
क्यमस्मि॥२७॥इतिस्तुतिंसमाकर्ण्यभगवांश्चंद्रशेखरः॥विजमाहप्रसन्नो
हंवरंवरयसुव्रत॥२८॥इत्येवंवचनंश्रुत्वाशंकरस्यमहात्मनः॥धर्मशर्मा
वरंतस्मैयाचयामाससुव्रतः॥२९॥द्विजउवाच॥ ॥यदिदेयोवरोमह्यंहरमे
त्वंकुरूपतां॥सभार्यस्यसुरूपत्वंप्रयच्छचसुसंपदं॥३०॥ द्विजउवाच|
यदिदेयोवरोमह्यंहरमेत्वंकुरूपतां॥सभार्यस्यसुरूपत्वंप्रयच्छचसुसंप
दं॥ ॥शिवउ॥नित्येविप्रस्वर्णदोलास्थितेर्मनानासंभाराद्यनार्चांविधत्से
तस्माद्दोलेशाभिधानोहमीशःप्रत्यक्षत्वंप्राप्तवानस्मिचात्र॥३२॥सत्वंदोला
तीर्थनामाद्यतीर्थेपत्न्यायुक्तःस्नाहिसद्रूपकामः॥तात्कालंसद्रूपमाप्स्यस्व
पीत्वंभार्ययायुक्तोमत्प्रसादादमोघात्॥३३॥एवंश्रुत्वाशंकरस्यार्थवाक्यंतस्मा
त्त्वंवैधर्मवर्माभिधानः॥दोलातीर्थेशंकराज्ञानवाप्यभार्ययायुक्तोसौच

कारावगाहं॥लक्ष्मीपउ॥हेमाधवाश्चर्यमिदंशृणुष्वतत्स्नानमात्रेणकुरूपता
गता॥पत्नीसमेतंद्विजपुंगवस्यशिवस्यचाप्यातुलितःप्रभाव॥३५॥तांदृष्ट्वा
रूपसंपन्नांसविस्मयःसाचतंपतिं॥उवाचसंतोषमापन्नोप्रणेमतुरुमापतिं॥
३६॥ऊचतुश्चजगत्स्वामिन्प्रसन्नेत्वयिवैनृणां॥किमलभ्यंजगन्नाथेसर्ववां
छितदायिके॥३७॥स्वामिन्नरूपंदत्तमार्त्तिंकिबंधोयावज्जीवंदेत्यनाशे
सिसौख्यं॥आरोग्यंसुपुत्रपौत्रांविद्धिमंतेमोक्षंदेहिसर्वेशशंभो॥३८॥
अन्यंचैकंवरंदेहित्वद्दोलातीर्थमुत्तमं॥येस्नांतिमानवानित्यंदोलेशंपूज
यंतियेत॥३९॥तेषांकामान्पूरयेथारूपायुर्धनसंपदः॥एतावांश्चवरोदेव
नान्यंवाच्यंजगत्पते॥४०॥दोलेशइतिविख्यातश्चत्यामरजनेच्छया॥त्वंप
रांश्चप्रियत्वाच्चव्रजदोलेशतांशिव॥४१॥इतिनस्यवचःश्रुत्वाशंकरोध
र्मवर्मणः दोलेशइतिविख्यातःस्तंभेचावस्थितोहरः॥४२॥तार्क्ष्योयद्यद्या
चितंदंपतिभ्यांतत्तत्सार्वंतांश्चापिदत्वा॥देवाधीशःसर्वशक्तिर्महेशोलिं
गंतद्धानंसमागाच्यधीशः॥४३॥ लक्ष्मीपति॥ त्वांप्रत्यहोमाधवयन्मयो
क्तमाख्यानमग्र्यंश्रवणात्सुमंगलं॥पापाब्धसर्वेपरमादरेणकिमिच्छसि
श्रोतुमहोःधुनावेद॥४४॥ ॥इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमहात्म्येदोला
तीर्थमहिमावर्णनंनामचतुर्विंशोध्यायः॥ ॥ऋषयऊचुः॥दोलातीर्थस्य
महात्म्यसूतत्त्वन्मुखतःश्रुतं॥इदानींविरजस्याहोमहात्म्यवदसुव्रत॥१॥

॥ ॥सूत उ॰॥ एवंपुरामेनेपृष्टः स्वगुरुर्माधवेनवै॥ लक्ष्मीपतिराहास्मैतदाख्या
४९ नंयदामिव॥२॥ माधव उ॰॥ श्रीलक्ष्मीपतिसंज्ञस्यद्गुरुवस्त्वद्दुत्कृपाथोभवं
मादुभूतकथारसादपमकरंदास्वादसंमोदिताः॥ दोलातीर्थकथोत्तरांसरव
करांमग्रेतनींसत्कथामारब्याहिश्रवणोत्सुकान्प्रतिवयंसंतोषनीयाल्वया
३॥ दोलातीर्थकथाप्रोक्ताभवतापपनाशिनी॥ इदानींविरजस्याहोतीर्थव
स्याहोभुकथांवद॥४॥ लक्ष्मीपतिरु॰॥ दोलातीर्थस्यमहिमामाधवत्वंप्र
तारितः॥ विरजस्याधुनाख्यानंतीर्थस्यशृणुसोख्यदं॥५॥ नमुचिर्नामराजा
सीद्दैत्यौजनेश्वरः॥ तस्यासपुत्रोबलवांछ्रवणोदानवाकृति॥६॥ पितरं
निहतंदृष्ट्वानमुचिंशातमन्युना॥ तद्देछुरंतपस्तेपेसर्वलोकभयंकरं॥७॥
एकाग्रधीःस्थितःपृथ्व्यांपांसुमुष्टिंसकृद्ग्रसन्॥ सह्यद्रोण्यांपुरावात्सीन्मेघैक
रसंगीपतः॥८॥ कृत्वातपोबहुदिनंब्रह्मादेवोनसोऽसुरः॥ तत्यशोभगवांस्त
स्मैबभूवचतुराननः॥९॥ वरंपाछंदमामासत्वंवरंवरयेतिच॥ एवंब्रह्मवच
श्रुत्वाश्रवणोसोसुदुर्मतिः॥१०॥ वरान्पयाचेब्रह्माणंसर्वज्ञास्त्रास्त्रयो
गनः॥ अमृत्युमात्मनःसर्वदेवेभ्यश्चऋषिसंघतः॥११॥ एवमेवास्त्वितिप्रा
हाभगवांश्चतुराननः॥ ब्रह्मणोवरदानेनसदुरात्मानिगर्वितः॥१२॥ देव ४९
र्षिमानवान्जिग्येसह्यद्रोण्याश्रयःकुधी॥ तेनोपद्रुतमालोक्यसर्वेदेवाः
सवासवाः॥१३॥ ब्रह्माणंशरणंजग्मुरूचुर्श्रवणसंकटं॥ तानुवाचततो

धातादेवादिभ्योऽमृतिर्मया॥१४॥ दत्तात्तस्माद्भवद्भिर्नवेश्चयंतस्यनविद्यते॥
तस्माद्भवद्भिर्नैवाहोयोद्धव्यंतेनवैरिणा॥१५॥ इदानींतस्यनाशायप्रार्थनीया
ध्यधीश्वरी॥ महालक्ष्मीकमलजायायासंमोहितंजगत्॥१६॥ स्तुवंतुलोकमल
जांसाप्रसन्नाभवद्भयां॥ नाशयिष्यतिनात्रास्तिसंशयोऽणुरपिध्रुवं॥१७॥
इतिधातुर्वचःश्रुत्वासर्वेदेवाःसवासवाः॥ श्रीमत्कमलजामंबांवाग्भिःस्तो
तुंप्रचक्रमुः॥१८॥ ॥देवाऊचुः॥॥ मास्तःसत्वरजस्तमोगुणमयेब्रह्मादि
वंदारकव्रातविभंवकारिणित्रिजगतामाद्येश्वरैर्वंदिते॥ नानादैत्यवि
घातिनिप्रतियुगंसद्भक्तसर्वार्थदेदैन्यध्वंसिनिपादिनःकमलजेकल्याणि
तुभ्यंनमः॥१९॥ त्वंवैकुंठनिवासिभुवनाधीशास्यहृद्योगनाविष्णोःसर्वस
रासुरार्चितपदांभोजस्यहृद्यारुतेः॥ लक्ष्मीरूपधरासमस्तजगतांकल्या
णसंभाविनीलावण्यहृदिनीसुरासुरवधूसंघैःसदापूजिता॥२०॥ त्वंकैरा
सनिवासिनोपिपरमानंदप्रदस्यानिशंभक्तानांजगदीश्वरस्यमहिषीदुर्गा
स्वरूपाप्यसि॥ वाणीयापिचतुर्विभागविदितासिद्धादिभिर्वंदितासापित्व
जगदीश्वरीत्वदपरंनास्तीहलोकत्रये॥२१॥ इतिस्तुतिंसमाकर्ण्यमहालक्ष्मी
दिवौकसां॥ तानाहचप्रसन्नास्मिवरान्वरयथेप्सितान्॥२२॥ देवाऊचुर्महा
लक्ष्मीर्यदित्वंवरदाह्यसि॥ त्वंवर्णंघातयस्वाद्यसर्वलोकैककंटकं॥२३॥
एवंश्रुत्वावचोदेवीवचनंचदिवौकसां॥ अवध्यंब्रह्मवरतःशस्त्रास्त्रैस्तं
विबुध्यच॥२४॥ सह्यद्रोण्यांपांसुराशिर्मध्यसक्तस्यतस्यवै॥ लवणस्यापरि

शुभागगनान्निपपातह ॥२५॥ तस्याःपतनमात्रेणचूर्णीभूतोबभूवह॥समु
द्रजलमानीत्वातद्देहपतनस्थले॥२६॥तडागश्चारनीरोवैजातस्तच्छोणिता
कृतः॥अद्यापितज्जलस्पर्शान्निशाचूर्णसमीनकं॥२७॥तत्कालंरक्तरूपं
वैभवत्येवनसंशयः यदापतज्जगद्धात्रीलवणेपरिवेगतः॥२८॥तत्पात्तवे
गादागच्छद्भुजःसर्वेदिशोदश॥ततोब्रह्मादयोदेवाःसमागत्यमहेश्वरी॥२
विदशाःशुभदामेतांतामूचुःसिंहवाहिनीं ॥अत्रत्वंस्थिरतांयाहिमानुषं
कमलजेशुभे॥ ३०॥त्वत्पातजमरुद्वोरादत्रत्यंविगतंरजः॥विरजंक्षेत्रमेत
द्धिभविष्यतिसुपुण्यदं॥३१॥ब्रह्मात्रस्थिरतांयातस्तस्माद्ब्रह्मगयास्मृता
अत्रपिंडप्रदानेनपितॄणामक्षयागतिः॥३२॥भवतुत्वत्प्रसादेनमनुष्याणांज
गद्धितं॥अत्रभागीरथीदेवीत्वदर्थंचागमिष्यति॥३३॥तस्यास्तत्तीरयोर्योगः
सोमाऽमायांभविष्यति॥सोमामायांनरायेवैस्नातितत्संगमेशुभे॥३४॥
तेषांकामान्पूरयस्वजगदानंददायके॥एवंवाक्यंसुराणांसाश्रुत्वाकमल
लोचना॥३५॥तथेत्यक्त्वाकमलजानाम्नातत्रावतिष्ठते॥तस्मात्तद्विरजाख्ये
हिपुरेलोकेषुविश्रुते॥३६॥तत्पुरस्थोद्विजःकश्चिल्लोलस्मार्त्तक्रियापरः॥
वेदशर्मामहाभागोवेदशास्त्रार्थपारगः॥३७॥साक्षात्कमलजाभक्तस्त
स्यापूजननत्परः॥एवंकालंनयंस्तत्रविरजाख्येपुरोत्तमे॥३८॥कस्मिं
श्चित्सिंहगेदेवगुरौगोदावरीजनाः॥गंतुकामाविदर्भस्थाविरजाख्येसमा

गताः॥३९॥तान्दृष्ट्वावेदशर्मापिद्विजान्कुतनमस्कृतिः॥पप्रच्छयूयंगंता
रः केनितान्द्विजपुंगवान्॥४०॥तमूचुःसिंहगेगोदावरीपापविनाशिनी
समस्तयज्ञफलदास्मादृच्छामहेवयम्॥४१॥तेषांवाक्यमितिश्रुत्वाहर्ष
निर्भरमानसः॥हृदिधृत्वाकमलजांगंगांतेःसहजग्मिवान्॥४२॥अनिष्टान
गतोगंगांदृष्ट्वासर्वेद्विजोत्तमाः॥संतोषंप्रापुरतुलंजगत्सौख्यविवर्धनीं॥
४३॥साष्टांगंतांप्रणेमुर्वैत्राहित्याहितिवादिनः॥धन्यानयंकृतार्थाश्चतेचै
वंवादिनोमिथः॥४४॥ततः सर्वेपिविहितंकर्ममुंडनपूर्वकं॥तीर्थश्राद्धा
दिकंचक्रुर्भक्तिमंतोद्विजोत्तमाः॥४५॥चतुर्षुमासेगतेषुगांगेतटेमुनीनां
वसतांसुपुण्ये॥अमाहिरांमेनयुतासमायायावाज्ञायमावेदमुनिर्महात्मा
४६॥सस्मारनेजंविरजंसुतीर्थंलक्ष्मीप्रियंब्रह्मगयाभिधानं॥अवापचिं
तांमहतीसवेदोगोदावरीप्रार्थनतत्परोभूत्॥४७॥दोलार्तातीर्थदक्षिणा
स्यांतिष्ठन्गोदावरीतटे॥सिंहस्थितेदेवगुरौसार्धकोटित्रिकोटिभिः॥४८
तीर्थैःसमेतामृषिभिर्विवेदवेदांगपारगैः॥परमार्थपरैःशांतैःसमलोष्टा
श्मकांचनैः॥४९॥स्वतीर्थाकृष्टचित्तोसौप्रार्थयामासगौतमीं॥कृतांज
लिपुटोभूत्वाविनयानतमस्तकः॥५०॥हेगौतमित्वंजगदेकसारेत्रैलोक्य
पूजाखिललोकधात्री॥शंभोर्जटामंडलवासिनीत्वात्पद्मप्रणा
नामिनित्यं॥५१॥सर्वतीर्थमयीदेवीयदित्वंसिंहगेगुरौ॥सत्यंचेद्विरजं

मातराविष्णुरूपिनिजोदरे ॥९२॥ एवंतद्वचनंश्रुत्वाद्विजस्यजगदीश्वरी॥रचतीरेदर्शया
मासविरजंलोकविश्रुतं ॥९३॥यावत्कालममावास्यासोमयुक्ताबभूवह॥ताव
द्रागीरथीदृष्ट्वालवणाख्यसरोयुता ॥९४॥तावत्कमलजादृष्टातदुद्भूतमियाभवत्
गतेमासोमयोगेवैगोतमैकेवदृश्यते ॥९५॥ततस्तेब्राह्मणाःसर्वेतीर्थमध्येवगो
तमी॥इत्येवंनिश्चयंकृत्वातत्रवासमरोचत ॥९६॥राजन्कमलजादेवीविरजे
तीर्थवर्यते॥तस्माद्दोलातीर्थयाम्येविरजंतीर्थमुत्तमं॥९७॥तदेवलोणारमिति
प्रोच्यतेचमनीषिभिः॥तस्मादमासोमयोगयत्रस्नानादिकाःक्रियाः॥९८॥कुर्वं
तिधनदानानिपिंडदानानिचैवहि॥तेसर्वेपितृभिःसार्द्धंगच्छंतिहरिमंदिरं॥९९
तस्मात्प्रतिष्ठानपुरेविरजंतीर्थमुत्तमं॥दोलातीर्थाद्दक्षिणस्यांमहापातकनाशनं॥
१००॥ ॥लक्ष्मीप०॥ ॥हेमाधवेतद्विरजाभिधानतीर्थस्यमहात्म्यमतिप्रसिद्धं॥शृणु
तियेचेचपठंतिभक्त्यातेयंचकामान्पुरुषालभंते ॥१०१॥ ॥इतिश्रीब्रह्मांडपुरा
णेप्रतिष्ठानमहात्म्येविरजातीर्थमहिमावर्णनंनामचतुर्विंशोध्यायः॥ ॥ऋष
यऊचुः॥ ॥विरजंतीर्थमाख्यातंसूतवदंसूतनस्त्वया॥इदानींनारसिंहस्यतीर्थ
स्यवदसत्कथां॥१॥ एवंपुरा॰॰पृच्छतिमाधवेवैलक्ष्मीपतिःप्राहचतांकृपा
लुः॥नृसिंहतीर्थस्यकथांसुदिव्यांमयोच्यमानामवधारयंतु ॥ माधवउ॰
लक्ष्मीपतेश्रीनरसिंहदेवपदांबुजासक्तमनोमरालः॥श्रुताकथात्वन्मुखतोवि
चित्रासुपुण्यदात्रीविरजस्यहृद्या॥३॥ नृसिंहतीर्थस्यकथांसुदिव्यामाल्हा

सूतउ॰ ५

९१

वेणपापनाशोभवेन्नृणां॥१६॥तत्रस्नेत्वेभवत्कश्चिन्नहरशर्माद्विजोत्तमः॥
स्वधर्मशीलसततं श्रीनृसिंहपरायणः॥१७॥साक्षात्कारंनृसिंहस्यलब्ध
वान्सद्विजाग्रणीः॥यानियानीहपुण्यानिजगद्दीक्ष्यभूतले॥१८॥क्षेत्रा
णिइष्टुकामोसोदक्षिणाशांजगामह॥सोव्यंकटेशगमंमन्त्राधस्तृप्तिसं
ज्ञके॥१९॥पुरेगोविंदराजंचददर्शाद्भुतदर्शनं॥२०॥स्नात्वाकपिलधारा
यांगोविंदराजसंज्ञितं॥गिरिमारुह्यनृहरिंपूजयित्वांतराहरिं॥२१॥स्वामिपु
ष्करिणीस्नातःस्तत्रश्रीव्यंकटेश्वरं॥पूजयित्वाजगन्नाथमवतीर्यततोनगा
त्॥२२॥सुवर्णमुखरीतीरेकालहस्तीश्वरंशिवं॥पूजयित्वाततोऽगाद्वेप
शीतीर्थमनुत्तमं॥२३॥पक्षिणंपूजयित्वाथकांचीविष्णुशिवप्रियां॥आ
गमद्विजवर्योसोदर्शनादेवपुण्यदां॥२४॥इदंमहेच्युतराजधानींविहाय
ययांतिचदुर्भगास्ते॥तनुत्यजोत्रप्रभवंतिकांच्यांमुरारयोवात्रिपुरारयोवा
॥२५॥तत्रगत्वाकोटितीर्थेस्नात्वेकाम्रंमहेश्वरं॥पूजयित्वोपचारैश्चसप्तगोपुर
मंडितं॥२६॥ततोगाद्विष्णुकांचीवैनारायणविराजितां॥यद्वमूर्त्तिश्चयद्यास्ते
वरदःसर्वदेहिनां॥२७॥त्रिभुवनकमनीयोवेगवत्युत्तरस्यानंतसरवरराज
त्पुण्यकोटीविमानो॥सकलभुवनवंद्योवेदवेदांतवेद्योजयतिवरदराजःसर्व
देवैकराजः॥२८॥देवंवरदराजानंतत्रसंपूज्यकेशवं॥पिनाकिनीतटरूढंवैज
यंतमाभुत्रिविक्रमं॥तंसंपूज्यविधानेनततोगादरुणाचलं मुक्तिर्यत्स्मरणा

देवजायतेभवपाशतः॥३०॥पूजयित्वासुरेशानंभक्त्यातमरुणाचलं॥मणिमुक्ता
नदीतीरेरुद्राचलमगात्ततः॥३१॥रुद्राचलेशसंपूज्यततःश्रीमुष्णमाययौ॥
तत्रयज्ञवराहंचसंपूज्यजगदीश्वरं॥३२॥चिदंबरमथागछद्दर्शनादेवमुक्ति
दं॥लिखितायत्रशेषेणशिलायांतोइवाकृतिः॥३३॥नृत्यंतीसपसपरिवारापरमा
श्चर्यकारिणी हाटकशोणसभातंडबहुनाटकपाटवपेशलं॥कोटिदिवामणि
भासुरंप्रणनामिचिदंबरनायकं॥ ३४॥आनंदेनृत्यसमयेनटनायकस्यपा
दारविंदमणिपूरसिंजितानि॥आनंदयंतिमदयंतिविमोहियंतिरोमांचयंतिनिय
नान्हनार्थयंति॥३५॥एताहक्लक्षणोपेतंचिदंबरमकल्मषः॥गुरुशर्मानमस्कृ
त्यततोगाल्कमलालयं॥३६॥तत्रोत्पन्नत्वमात्रेणमुक्तिंप्राप्नोतिमानवः॥तत्र
त्यांकमलांदेवींसंपूज्यचयथाविधि॥३७॥अग्नेजगामदेवंतंराजगोपालसंज्ञि
तं॥तंनमस्कृत्यकावेरीतीरेणैवद्विजोत्तमः॥३८॥कावेरीमध्यनिलयंश्रीरंगशा
यनंययौ॥यत्रास्तेशेषपर्यंकशयनोजगदीश्वरः॥३९॥इदंहिरंगंत्यजतामिहो
गंपुनर्नचांगंयदिवास्तिचांगं॥करेरथांगंशयनेभुजंगंयानेविहंगंचरणंबुगं
४०॥देशांतरगतोवापिग्रामांतरगतोपिवा॥श्रीरंगमितिमुरवोभूत्वासर्व
पापैःप्रमुच्यते॥४१॥इत्यादिलक्षणैर्युक्तंश्रीरंगंसंप्रयुज्यच॥तत्रैवजंबु
केशंतमर्चयित्वासुरेश्वरं॥४२॥ततोऽगात्त्रिजनापद्भिंच्यवनीश्वरभूषि
तं॥च्यवनीश्वरमभ्यर्च्यततोगान्मधुरांशुभां॥४३॥वेगवत्यास्तटेरम्येसं

दरेश्वरभूषिते ॥मानार्क्षांसंदरेशंचपूजयित्वायथाविधि॥४४॥ततोऽगात्सेतु
बंधंचश्रीरामेशमतंद्रितः॥रघुवीरपदन्यासपवित्रीकृतपोसवे॥४५॥दृश्या
कंठशिरच्छेदहेतवेसेतवेनमः॥एवंसेतुंनमस्कृत्यरामचंद्रविनिर्मितं॥स्ना
त्वाधनुष्कोटिजलेसर्वपापापहेनृणां॥रामेश्वरंसमाभ्यर्च्यततोस्कंदंसमाय
गात् ॥४७॥तत्रैवसंगमेस्नात्वाताम्रपर्णीसमुद्रयोः॥स्कंदंसंपूज्यविधिव
त्ताम्रपर्णीतटेनवै॥४८॥गत्वागजेंद्रमोक्षंचाप्याद्यनंतंतथैवच॥ताम्रपर्णु
द्गमेस्नात्वानत्वादेवंशिवंततः॥४९॥कन्याकुमारिकांनत्वासिंधुतीरनिवासि
नीं॥आद्यनंतंततोगत्वासर्वकामप्रदायकं॥५०॥तदुक्थंचततःकाशीस्थि
तंविश्वेश्वरंविभुं॥नत्वापापविनाशारव्येशंकरंप्रणनामच॥५१॥ततःश्रीमदनं
तंचसंपूज्यागाज्जनार्दनं॥तंसंपूज्यततोऽगाद्वैसुब्रह्मण्यंप्रगामसः॥५२॥
स्नात्वाकुमारधारायांसुब्रह्मण्यंप्रपूज्यच ॥तदुक्थस्यंततःकृष्णंनत्वास्तु
त्वाबिकोततः॥५३॥गोकर्णंसमगामाथततोहरिहरेश्वरं॥समुद्रतीरविख्या
तंसप्तकोटीश्वरंततः॥५४॥ततःकोल्लापुरंगत्वामहालक्ष्मीप्रपूज्यच॥त्रैलो
क्यवासिनींदेवींसर्वकामप्रदायिनीं॥५५॥महाबलातिबलिनौकृष्णोद्गम
निवासिनौ॥समाभ्यर्च्यततःकृष्णातीरेणैवसदेवताः॥५६॥मल्लिका ९३
र्जुनमासाद्यविश्रांतिंपरमांगतः॥स्नात्वापातालगंगायांमल्लिनाथंप्रपू
जयन्॥५७॥तुंगभद्रांतथाकृष्णांभीमांप्राप्यसरिद्वरां॥ततोभीमातटेपु

ण्येददर्शद्विजपुंगवः॥पांडुरंगेश्वरंदेवमतिविश्रांतिदंनृणां॥तत्रावसत्सक
लंचित्कालंचद्विजपुंगवः॥५९॥पूजयन्यांपांडुरंगेशंसाक्षान्नारायणंवि
भुं॥प्रत्यहंतुलसीपत्रसहस्त्रेणरमापतिं॥६०॥पूजयन्नामभिर्दिव्यैरष्टो
त्तरसहस्त्रकैः॥विश्रांतिंपरमांप्रापदुरावापांडुरात्मभिः॥६१॥कदाचिद्गंगो
मलकीर्त्तिमीशामालक्ष्यशंभानिशायैकभाजनं॥स्तुतिंचकारातिविनम्र
मूर्द्धाप्रहृष्टरोमागुरुशर्मकोद्विजः॥६२॥श्रीविठ्ठलत्रिभुवनैकनिदान
विष्णोसर्वेशसंकटसमुद्धृतदेवजिष्णो॥विश्वार्तिहंकमलशालविशाल
नेत्रमामुद्धरोद्धरभवार्णवमग्नमीश ॥६३॥संसारसिंधुभवभीतहृदांत
राणांसंसारसिंधुकटिमात्रजलंनिजानां॥संदर्शयंतमखिलश्रुतिगीतकीर्तिं
देवाधिदेवमघनाशकनामधेयं॥६४॥संसारतापत्रयसंगभंगंदूर्वादल
श्यामकोमलांगं॥पदारविंदोद्भवपुण्यगांगंचेतश्चिरंचिंतयपांडुरंगं॥६५॥
भीमातटस्थितपोधनपुंडरीकभक्त्येवभेमपुलिनस्थितमद्वितीयं॥३६॥वि
श्वस्थितिप्रलयहेतुमनन्यहेतुंश्रीपांडुरंगंतमहंशरणंप्रपद्ये॥६६॥ ॥लक्ष्मी
पतिरु०॥ ॥एवंस्तुवन्नतुदिनंबहुकालमतंद्रितः॥उवासतत्रवरदपांडुरंगा
लयेशुभे॥६७॥ततोनीराभीमासलिलवरसंभेदनिकटेवरंतंसिंहास्यंवि
भुवनसमुद्धारनिपुणं॥अगाद्देवंद्रष्टुंनरहरिपुरंसर्वजनतामहाघौघध्वांतारु
णकिरणरूपंस्फुरकरं॥६८॥नित्यंस्नानपरोनीराभीमासंगेतवारिणि॥

पूजयन्नरसिंहंसकृंचिक्कालमुवासह॥६९॥ततोजनमुखाद्देवीमाकर्ण्यत्व
रितांश्च गां॥जगामद्रष्टुकामोसौमहिषींजगदंबिकां॥७०॥ ॥द्विजउवा॥ ॥
त्वरितेजगदेकवंदितेपरिपूर्णीकृतकामसंतते॥निजभक्तजनस्यसर्व
देजगदानंदकरिप्रसीदमे॥७१॥महिषासुरमर्दनप्रचंडेजगदाद्येहत
दुष्टचंडमुंडे॥करुणार्द्रतरैर्निरीक्षणैःकुरुमांत्वंहिसुरैकभाजनं॥
७२॥द्रुहिणप्रभृतित्रिविष्टपावरसंथैर्वंदितपादपंकजे॥ममचित्तमरालस
त्तमोवरंतुत्वत्पदद्वयनीरजे॥७३॥तुलजापुरवासिनीभवार्नाभवतान्नः
सुरवकारिणीमृडानी॥निजभक्तसुरैकराजधानीयदधीनानिसमस्तमं
गलानि॥७४॥एवंस्तुताजगद्धात्रीद्विजेनगुरुशर्मणा॥तंप्राहपरमप्रीत्यात्वं
वरंवरयेतिच॥७५॥ ॥द्विजउवाच॥ ॥श्रीनृसिंहपदांभोजेयातुरूढेर्य
हिमेमतिः॥यदाहंतंस्मरिष्यामितदासान्निध्यदोऽस्तुमे॥७६॥तथेतिदेव्या
प्रोक्तोऽसौतत्पूजनपरःसुधीः॥ततोसौदृष्टसेतुर्वैदृष्टश्रीमल्लिकार्जु
नः॥७७॥द्वादशोवृत्तावर्तलिंगसमूहंद्रष्टुमुद्यतः॥जगामडाकिनीस्थानंय
तोभीमारथमुद्गता॥७८॥रामेशरामहरीश्वरभीमनाथश्रीवैद्यनागेश्वर
कुंकुमेशान्॥श्रीत्र्यंबकोंकारमहाख्यकालसोमेशकेदारसुविश्वना
थान्॥७९॥सोमेश्वरप्रसंगेनद्वारकांसजगामह॥गोमतीसंगमेस्नात्वा
श्रीकृष्णंसमपूजयत्॥८०॥अयोध्यामथुरामायाकाशींकांचीमवंति

कां॥द्वारकांचततोगत्वातत्तीर्थेत्वनंतकं॥८१॥कृत्वातद्देवतापूजांदृष्ट्वाज्वा
लामुखींशिवां॥नरनारायणौचैवनेमिषंपुष्करंतथा॥८२॥प्रयागंचकुरुक्षे
त्रंदृष्ट्वाचविधिपूर्वकं॥स्वग्रामंगंतुकामोसौरेवांतापींपयोष्णिकां॥८३॥देववा
टिंचतत्तीरेनरसिंहंददर्शह॥स्नात्वापयोष्ण्यांसिंहास्यंपूजयन्जगतांपतिं॥८४
उवासकंनिचित्कालंसनरसिंहंस्मरन्सदा॥एवंचसनितत्रैवदेवद्विजो
त्तमः॥८५॥आजगामाथकालेनसिंहराजोहरस्मृतिः॥आकर्ण्यगो
दामाहात्म्यंतदुत्कंठोबभूवह॥८६॥आकर्ण्यगोदामहिमानद्भुतंसिंहस्थितं
देवगुरौविशोधनः॥द्विजोत्तमेभ्यःश्रुतशास्त्रनिर्ज्ञोजगामगोदांपरपुण्यकं
दा॥८७॥श्रीमत्प्रतिष्ठानपुरेद्विजोत्तमोददर्शगोगासकलाघभंगां॥अत्यंत
तोपंसमवापभक्त्याननामसाष्टांगमुदारचित्तः॥८८॥चिरजाहृक्षिणेभागे
गोदायामुत्तरेतटे स्नात्वागंगाजलेरम्येविश्रांतिंपरमांययौ॥८९॥तत्रस्थित्वा
कदाचित्सनरसिंहमचिंतयत्॥चिरकालंसतस्थेशोभक्तिंबुध्वारमापतिः॥९०
स्तुतिनावरदानाद्यैसप्रत्यक्षीबभूवह॥आविर्भूतेनथातस्मिन्नष्टादशा
भुजेहरौ॥९१॥विदारनरसिंहाख्यकोटिसूर्यसमप्रभं॥गुरुश्रामाभिधो
विप्रोभक्तिरुक्षणलक्षितः॥९२॥अस्तोषीज्जगदात्मानंसर्वागमगणस्तुतं
वचनैःकोमलरतैःश्रोत्रश्रोत्रमनोहरैः॥९३॥ ॥द्विजउवा॥यत्पादपंक
जरजःपरमादरेणसंसेवितंसकलकल्मषराशिनाशि॥कल्याणकारणम

मशेषनिजानुगानांमत्वंनृसिंहमयिधेहिकृपाकटाक्षं॥९४॥सर्वत्रचंचलनकायु
नयापिलक्ष्म्याब्रह्मादिवंद्यपदयास्थिरयान्यपंवि॥यादारविंदयुगुलंस्थिरमा
दरेणसत्वंनृसिंहमयिधेहिकृपाकटाक्षं॥९५॥यद्रूपमागमशिरःप्रतिपाद्य
माधमध्यालिकादिपरितापहरन्निजाना॥ध्येयंसकैरेरपिगनाखिलदोषसं
घैःसत्वंनृसिंहम॥९६॥प्रह्लादभक्तवचसाहरिराविरासस्तंभेहिरण्य
कशिपुयउदारभावः॥उर्वीनिधायतदुरोनखरैर्दरारमत्वंनृसिंहमयिधे
हिकृपाकटाक्षं॥९७॥योनेजभक्तममलांबुधिभूधरोग्रशृंगप्रपातविषदं
तिसरीसृपेभ्यः॥सर्वात्मकःपरमकारुणिकोररक्षत्रश्रीनृसिंहमयिधेहिकृपा
कटाक्षं॥यद्रूपमुग्रमरिमर्दनभावशाखिसच्चिंतनेनसकलाहवभीतिहा
रि॥भूतग्रहज्वरसमुद्भवभीतिनाशिसत्वंनृसिंहमयिधेहिकृपाकटाक्षं॥
९९॥यस्यार्त्तमेयशउमापतिपद्मजन्मशक्रादिदेवतसमस्तसभासुगीतं॥श्रु
त्यैवसर्वशमलप्रशमैकदक्षंसत्वंनृसिंहमयिधेहिकृपाकटाक्षं॥१००॥ ॥
श्रीरुपउ॥ ॥एवंस्तुत्वास्तुतिंदेवःकल्पितांगुरुशार्मणा॥तमाहनृहरिर्देवः
त्ववरंवरयेतिवै॥१॥सोपिसिंहाननंवव्रेत्वद्भक्तिंदेहिमेप्रभो॥किमन्य
नवरेणात्रह्यध्रुवेणाक्षयेनच॥२॥अन्यमेकंवरंदेहिदेवदेवदयानिधे
सर्वेषामवतारणांमूलमूर्तिप्रदर्शय॥३॥इतिपर्यंकशायनंदिव्यांक्षीरा
ब्धिवासिनी॥करासरशिरोरत्ननीराजितपदांबुजां॥४॥इतिद्विजवचःश्रुत्वा

नृहरिकरुणाविधिः॥स्वसन्निधावुदग्भागेमुरव्यानारायणीतनूं॥दर्शयाम
सभक्तायसर्वलक्षणसंयुतां॥तांदृष्ट्वामूर्तिममलांगुरुशार्मोद्विजाग्रणीः॥६
पुनःपुनर्ननामासावतिहर्षाश्रुलोचनः॥धन्योस्मिकृतकृत्योस्मिसनाथोस्मी
त्यौवाचत॥अन्यमेकंवरंदेहिसिंहाननजगत्पते॥नृसिंहतीर्थंयःस्नाति
यस्त्वन्मूर्तिंचपूजयेत्॥८॥मत्कृतंत्वत्परंस्तोत्रंयेपठंतीहमानवाः॥तेषांसा
र्वप्रदस्त्वंहिसदासन्निध्यदोभव॥९॥इतिद्विजवचःश्रुत्वातत्रैवावसदी
श्वरः॥अष्टादशभुजोनारसिंहोनारायणस्तथा॥१०॥तंकालमारभ्यनृसिं
हतीर्थंमहाद्भुतंमाधवकामदायि॥स्नानादिनादर्शनतोपियस्यस्तोत्रस्य
पाठादपिसंस्तुनेश्वा॥११॥यएतदाख्यानमहोपठेतश्रृणोतिवामाधवभक्तियुक्तः
नृसिंहमूर्तेःकरुणाकटाक्षात्प्राप्नोतिभुक्तिंचतथैवमुक्तिं॥९१२॥॥इतिश्रीब्रह्मो
इपुराणेप्रतिष्ठानमहात्म्येनृसिंहतीर्थमहिमावर्णनंनामपंचविंशोध्यायः॥
ऋषयऊचुः॥ ॥नृसिंहाख्यानमेतद्धिश्रुतंत्वन्मुखतोद्भुतं॥इदानींमच्चतीर्थस्य
महात्म्यंवदशोभनं॥१॥पूर्वमेवंहिपृष्टस्तुमाधवेनखदेशिकः॥लक्ष्मीपतिर्यथा
हेनंतथैवकथयामिवः॥२॥माधवउवाच॥ ॥श्रीमल्लक्ष्मीपतेत्वद्वदनविगलि
तात्यद्भुताश्रीनृसिंहतीर्थाख्यानेनतृप्तागुरुवरपरमंसौख्यप्राप्तावरिष्ठं॥विद्व
द्वर्याश्चतीर्थानिमधुरसुकथांब्रूहिपापापहंत्वंनानाशिष्यात्मबोधप्रहृततमः
संचयज्ञानसिंधो॥३॥हेमाधवश्रीनरसिंहदेवाख्यानमयोक्तसुखदंतवाग्वै

शृण्वघाग्नेस्तस्वदाश्वत्तीर्थमहात्म्यमद्भुतमादरेण॥४॥अत्रेतिहासंवक्ष्यामिह
यग्रीवाभिधस्यैवै कलिंगदेशराज्ञोवैपरमाश्चर्यकारणं॥५॥कलिंगदेशेराजाभू
स्वधर्मनिरतःशुचिः॥हयग्रीवइतिख्यातःप्रजापालनतत्परः॥६॥जन्मांतरी
यामिनपुण्ययोगात्सामुद्रिकाद्गोषसलक्षणैर्युतः॥रूपेणकामप्रतिमोध
नेननकुबेरतुल्यःक्षमयाधरासम॥७॥बुध्याबृहस्पत्युपमोजवेनसमीरतुल्य
कमलाभलोचनः॥शौर्येणयातार्जुनतुल्यनामसावाजानुबाहुःसमरानिवर्ति
न॥८॥सस्सूर्यवंशोद्भवराकदागुणीगुणार्णवंनैजगुरुंवसिष्ठं संप्रार्थयामास
महानुभावंकृतांजलिर्भक्तिविनम्रमूर्धा॥९॥स्वामिंस्वदीयात्करुणाकटाक्ष
त्मामास्तिगेहेपरिपूर्णवित्तं नेनाश्वमेधंखलुकर्तुकामःस्वदाश्रयोहंतृप
पूर्णसिद्धिं॥१०॥वसिष्ठमेवंसंप्रार्थ्यतदाज्ञावशगोनृपः॥चंद्रग्रहानुकूल
वसुमुहूर्तेगुरूदिने॥११॥गणेशपूजनंकृत्वाकृतपुण्याहवाचनं॥हय
मकर्णहयंयज्ञयोग्यलक्षणलक्षितं॥१२॥पुरस्कृत्यजगामासोचतुरंग
बलान्वितः॥विजेतुंपृथिवींकृत्स्नांससद्वीपांससागरां॥१३॥भद्रानगाश्च
मगधान्निषधांस्तथा॥काश्मीरान्यार्वतंश्चैवजिग्येसतुरगोनृपः॥१४॥
यत्रयत्रददर्शासौवीर्थानिविविधानदी॥सतत्रहव्यकव्यानिचकारनृपस
त्तमः॥१५॥तीर्थक्षेत्रनिवासिभ्योदानानिविविधानिच॥अददद्धनवि
निपूरयन्द्विजवांछितं॥१६॥अत्यंतबलसंयुक्तान्युद्धविद्याविशारदः॥
चतुरंगबलोपेतान्स्वतोप्यधिकसैनिकान्॥१७॥जिग्येगुरुप्रसादेनराजास्व

डायरा गाऊदाजी इत्यारा स्मारक MEMORIAL

त्मबलोपिसन्॥सतांहिकरुणातातकिंन्नयछतिदेहिनां॥१८॥सतांकृपा
येषुनरेषुविद्यतेतेंऽतश्छिन्नान्क्रोधमुखान्सदाहिनान्॥पराभवंतिप्र
बलानपिध्रुवंनदुष्करोचाह्यरिपोःपराभवः॥१९॥महानुभावैककृपांकितानां
सवार्णवोगोष्पदतामुपैति॥अंतःस्थितःक्रोधमुखारिवर्गःपयेलतेध्वांतमि
वार्कभासा॥२०॥तस्माद्वसिष्ठसंयुक्तोयत्रयातिस्वयंनृप॥तत्रत्यासर्वभू
तावैपराभूताभवंतिहि॥२१॥विजिलेसर्वदिक्चक्रेगोतमीमगमन्नृपः प्र
तिष्ठानपुरस्तांवैगोतमींसददर्शह॥२२॥आदौभोगवतीयातःससैन्यःसपु
रोहितः॥तत्रस्नात्वाविधानेनकृतंसिद्धेशपूजनं॥२३॥प्रदक्षिणीकृत्यपुरंप्र
तिष्ठानाभिधंमहत्॥क्रमेणस्नानमकरोत्तीर्थेषुविविधेषुच॥२४॥श्रीरेणुकावि
घ्नपभद्रगामब्रह्मप्रयागेषुकृतावगाहः॥गयाकुरुभैरवनागह्रदाक्रकालीसुती
र्थेष्वपिजातमज्जनः॥२५॥पूर्वोक्ततीर्थगान्देवान्संपूज्यविधिवत्तदा॥
कालीतीर्थादुत्तरस्यांस्वसेनासन्निवेशयत्॥२६॥तस्मिन्नवसरेशक्रस्त्व
श्वंहर्तुंसमुद्यतः॥अतींद्रियस्वरूपेणजहाराश्वमसूयया॥२७॥विज्ञायाश्व
हृतेराजाविषादाकुलमानसः॥पप्रच्छसद्गुरुंसाधोवसिष्ठब्रह्मवित्तमं॥२८॥
सर्वभूतादिवेत्तारंसर्ववेदांगपारगं॥स्वामिन्वसिष्ठसैन्येषुसावधानेषुरक्षि
रिद्भिः॥२९॥क्रतुमुख्यांगमश्वोयंकेननीतस्त्विदंवद॥इतिवादिनिभूपा
लेवसिष्ठोज्ञानिनांवरः॥३०॥क्षणंध्यात्वासबुबुधेशक्रनीतंतुरंगमं॥त
तः सकथयद्राज्ञेशक्रनीतंतुरंगमं॥३१॥तच्छ्रुत्वाराजशार्दूलःपुनःपप्रच्छ

नंमुनिं।। तुरंगशिरसामाकंकथंभवतिनद्वद।।३२।।तृप्तेक्रतुहानिःस्यानदुपायंवदाधुना।। इतिराज्ञोवचःश्रुत्वाराजानंमुनिरब्रीत्।।३३।।राजन्निष्टस्यसिध्यर्थंदरिष्टस्यचनाशनं।शंभोरर्धासनंतूसर्वनात्रकार्याविचारणा।।३४।।तस्मात्तदाराद्धनतःकार्यसिद्धिर्भविष्यति।।लिंगंस्वनाम्नासंस्थाप्यत्वंतमाराधयप्रभु।।३५।।आराधितस्त्वयादेवांछितंपूरयिष्यति।। वासिष्ठवचनंश्रुत्वाहयग्रीवोभिधोनृपः३६।हयग्रीवेश्वरंलिंगंसंस्थाप्यादरसंयुतः।।एकांगुष्ठेनभूमिंसस्पृशन्ननशनोव्रती।।३७।।चिंतयंस्सर्वभावेनरुद्रंलोकशंकरं।गंगाविषचणस्नार्याजितसर्वेंद्रियःरुधीः।।३८।।तमेवानुस्मरंदेवंभक्तानुग्रहकारकं।मासमात्रंनपस्तेपेचातिकृशान्नृपोत्तमः।।भगवंस्तंददर्शासौलिंगाधिपोभवंमीश्वरं।।तंराजानमनश्नंतमेकांगुष्ठधराश्रितं।।४०।।तंदृष्ट्वाजगदीशोपिप्रादुभूतोबभूवह तंदृष्ट्वाजगतांमीशमनादिनिधनंशिवं।। ४१।।अस्तौषीज्जगतांमीशंवचनैरतिकोपलैः।। ४२।।राजोवाच।। शंभोत्रिलोकपरिपालमहाविभूतेकर्पूरहृद्यजगतांधरहृद्यकांते।।भालस्थलातिपिहितःस्मरदाहकाग्निस्त्वंपूरयाशुमनवांछितमातबंधो।। ४३।। योब्रह्मरूपधृगिदंभुवनंकरोतियःपालयत्यपिजगध्दृतविष्णुरूपः।। योरुद्ररूपधृगिदंहरतेसदेवस्त्वंपूरयाशु०।।४४।। यन्नामधेयमखिलश्रुतिसंघगीतंसंस्मर्तृसर्वजननासकलाघहारी।। सर्वार्थदुःस्वजनतापहरःसदाशुस्त्वंपूरयाशुमम०।। ४५।।स्तुतिमेवंविधाश्रुत्वासंतुष्टःशंभुरब्रवीत् याचयत्वंवरंराजन्प्रसन्नोस्मियतस्तव।।४६।।मयितुष्टेकिमप्राप्यंभक्ता

नांवरदायकं।।तस्मात्सर्वात्मनाकामंपूरयिष्येतवानघ।। ४७।।श्रुत्वैवंशंभुवाक्यंसराजाप्रोवाचशंकरं।।स्वामिन्कृतंगतोमेकेनाप्यर्थोहृतोस्तिचे।। ४८।।तद्देहिमेमहेशाश्वंपूर्णंयज्ञंकुरुष्वमे।।भक्तकामदइत्येतन्नामसत्यंकुरुप्रभो।।४९।।इत्थंनृपवचःश्रुत्वाशंभुर्भक्तजनप्रियः।।उवाचतंनृपंराजन्त्यजचिंतांमनोगतां।। ५०।।इदानीमानयिष्येहंकृत्वंगतुरगंतव।।परिपूर्णंकरिष्यामियत्तेंतवमहामते।। ५१।।आधारेणैनंसराजानंप्रमथंसगणंहरः।।आकारयित्वाप्रोवाचशीघ्रंत्वंगच्छवासवं।। ५२।।साश्वंतमानयात्राहोमदाज्ञाबलमाश्रितः।।सगणःशंकरादेशंश्रुत्वागान्निद्रशालयं।। गत्वासभायांदेवानांवासवंप्रत्युवाचह।।देवासवत्वमागच्छसहाश्वेनशिवाज्ञया।। ५४।।प्रतिष्ठानेहयग्रीवमुपाराधितशंकरं।। गणोक्तंवाक्यमाकर्ण्यभीतस्त्रिदशराट्स्वयं।। ५५।।अश्वेनसहितःप्रागात्प्रतिष्ठानपुरंशुभं।। तत्रशंभुंविलोक्यासौसाष्टांगंप्रणनामह।। ५६।।उवाचचविनीतांगःस्वामिन्शंभोक्षमस्वमे।।अपराधंजगन्नाथदीनानुग्रहकारक।। ५७।।त्वत्प्रसादेनदेवेशलब्धोश्वोऽनेनभूभुजा।।त्वत्प्रसादोनचेद्देवतुरंगाप्तिःसुदुर्लभा।। ५८।।तस्मात्सर्वात्मनादेवत्वत्प्रसादोमनीषिणा।।संप्रार्थनीयःसंसारेसचसर्वार्थदःस्मृतः ५९।।अयंग्राह्यश्चतुरगोमयातुभ्यंनिवेदितः।। यस्मैदास्यसितस्मैवैत्वयादेयस्तुरंगमः।। ६०।।इत्यङ्कात्रश्वंसमानीयशंकरायेन्यवेदयत्।।ततश्चशं

मुंचिज्ञाप्यशक्रःस्वर्गमगाद्द्रुतं॥६१॥अथद्रोणगुरुवाचेदंराजन्नश्वंगृहाणवै॥
क्रतुस्तेसांगतांयातुपुन्यरन्यंवरंशृणु॥६२॥इतिद्रोणवचःश्रुत्वाराजोवव्रेवरं
तरं राजोवाच॥ त्वंस्वामिन्यदितुष्टोसियद्दासिवरांतरं॥६३॥अस्मिन्ती
र्थेमयाश्वोयंरुब्धःश्रीमत्प्रसादनः॥तस्मादिदंवाश्वतीर्थमितियातुप्रथांभुवि
॥६४॥हयग्रीवेश्वरइतिनाम्नात्वंस्थिरोभव॥अश्वतीर्थेकृतस्नानायत्वल्लिंगप्र
पूजकाः॥६५॥तेषांकामान्पूरयेथापुत्रपौत्रधनादिकान्॥हयग्रीवेश्वर
श्यात्रयेकानांप्रयकामद॥६६॥अत्रयेर्धनदानादिजपहोमादियत्कृतं
तत्सर्वमक्षयंदेवभवतुत्वत्प्रसादतः॥६७॥अत्रयःपिंडदानंवैकुर्याद्वै
तिलतर्पणं॥तेषांपितॄणांत्वल्लोकावासिश्चैवभविष्यति॥६८॥तथास्वि
तिजगत्स्वामीप्रोक्तासर्वेश्वरोहरः॥हयग्रीवेश्वरेलिंगेप्रापार्थोतनयमीश्वरः
॥६९॥ततोहयग्रीवनृपःसलिंगेस्वनामकंपंक्तियुतःप्रपूज्य हयंगृहीत्वास
पुरोहितोःसोजगामदेशंनिजमृद्धसैन्यः॥७०॥तस्मात्तत्कालमारभ्यतद्वी
श्वतीर्थमुच्यते॥तत्रस्नानाच्चदानाच्चपितॄणांचापितर्पणात्॥७१॥सर्वका
मसमृद्धस्यादंतेचपितृभिःसह॥हरेःसालोक्यमाप्नोतिसर्वैःस्वपितृभिःसह
॥७२॥ लक्ष्मीपव॥ ॥अत्यंतपुण्यप्रदमश्वतीर्थमाहात्म्यमत्यद्भुतमादितो
मया॥हेमाधवत्वांप्रतियन्मयोक्तंतत्प्रायतःसंश्रवणाच्चपापहृ॥७३॥ ॥
इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमाहात्म्येअश्वतीर्थमहिमावर्णनंनामषट्वि
ंशोध्यायः॥ ऋषयऊचुः॥ ॥त्वन्मुखाद्श्वतीर्थस्यमहिमाःसद्भुतःश्रुतः

इदानींकालिकातीर्थमाहात्म्यंवदशोभनं॥१॥सूतउवा॥ ॥यथाभवद्भिःप्र
श्नोयंकृतस्तद्वन्माधवः॥लक्ष्मीपतिंयत्प्रछसतन्माहवदामिवः॥२॥ ॥
माधवउवाच॥ ॥स्वामिंछीनरसिंहदेवभजनासक्तांतरश्रीगुरोत्वद्भक्तो
बुजतोःश्वतीर्थमहिमासर्वोपिवाकर्णितः॥कालीतीर्थमहित्वमधुनाश्रो
तुंहिवांछास्तिनस्तस्मोच्छावयकालिकावरकथांश्रोत्रैकसौख्यप्रदां॥३॥
॥लक्ष्मीपति॥ हेमाधवशृणुकथांमनोहरांकालिकाभिधस्यतीर्थगोच
रां॥यत्कथाश्रवणतोनजातुचिद्वीसिलेशदुर्तिजायतेनृणां॥४॥अत्रतेक
थयिष्यामिपुरावृत्तंकथानकं॥यत्कथाश्रवणेनैवसर्वान्कामानवाप्नुयात्
५॥पुरायज्ञंकर्तुकामोगालवाख्योमहामुनिः॥स्वलंविचारयामास
यज्ञयोग्यंस्वनिर्मलं॥६॥विंध्यदक्षिणनद्यांशैलैःस्वलंशुद्धंविचारयन्॥
नर्मदांतपतींचैवप्रणीतामम्बोदकं॥७॥पूर्णांचाप्यवगाह्याथततोगो
दावरींययौ॥दृष्ट्वागोदांसरिच्छ्रेष्ठांविश्रांतिंप्रापसद्विजः॥८॥विंध्यस्य
दक्षिणेदेशोयत्रगोदावरीनदी॥पृथिव्यामपिकृत्स्नायांसप्रदेशोमनोर
मः॥९॥इत्यादिप्राक्तनैर्वाक्यैर्गत्वागोदावरींनदीं॥तांदृष्ट्वाहर्षमतुलंम
वापमुनिसमस्तः॥ १०॥ ऋषिसंघसमायुक्तआदोभोगवतींययौ॥
तत्रस्नात्वाचविधिवत्कृतसिद्धेशपूजनः॥११॥अष्टमूर्तिसमालोक्यसिद्धे
शंस्वरपूजेत्॥तन्मूर्ध्निभोगवतिकानिःसरंतींसरापगां॥१२॥सिद्धेशसेवा

निरतःसहितःसर्वैर्द्विजः॥संतोषंपरमंप्रापदुरावापंदुरात्मभिः॥१३॥साष्टां
गंप्रणनामाथस्तुतिंकर्तुंसमारभत्॥सात्त्विकैर्लक्षणैर्युक्तोहर्षबाष्पांबु
पूरितः॥१४॥ ॥द्विजउवाच॥ सिद्धेशजगदानंदकंददेवकृपानिधे
गिरिजाकोमलकरसंलालितपदद्वय॥१५॥जयदेवजगन्नाथजयविश्वा
र्तिभंजन॥जयहृद्यजटाजूटशोभिगंगाजलप्रभो॥१६॥जयाखिलाम
रार्तेयमदनध्वंसकारक॥जयमायामयाशेषजगत्संहारकारक॥१७॥त्वां
नतास्मोवयंसर्वेपाहिनःशरणागतान्॥संसारदावभीतानांनंहिनःपरमो
गति॥१८॥इतिस्तुत्वामहादेवंसिद्धेशंलोकपूजितं॥देवंप्रदक्षिणीकृत्यजगाम
राहिगालवः॥१९॥ग्रामंप्रदक्षिणीकृत्यमुनिसंघसमावृतः॥ययौयागस्थलं
सम्यग्विचिन्वन्शुद्धमानसः॥२०॥अश्वतीर्थादक्षिणस्यांगंगानीरसुनि
र्मले॥आरभद्देवयजनंगालवोमुनिसत्तमः॥२१॥ऋषिसंघसमायुक्तःपू
जयित्वागणेश्वरं॥पुण्याहादित्रयंकृत्वायजमानोहिगालवः॥२२॥ऋत्वि
जोवरयामासऋत्विग्लक्षणलक्षितान्॥अध्वर्युमकरोत्तत्रभरद्वाजंगु
णान्वितं॥२३॥भृगुंब्राह्मणमकरोद्धोतारंभार्गवंतथा॥उग्नीध्रंपुलहंचक्रे
पुलस्त्यादियथाक्रमं॥२४॥षोडशर्त्विग्गणंकृत्वाकर्मारंभमकारयत्॥अ
स्मिन्नवसरेकश्चिद्दैत्यदूतःपुलोमजः॥२५॥यज्ञंविलोकितुंयातोयज्ञध्वं
सकरःखलः॥यज्ञारंभंसविज्ञायदैत्यानानयितुंगतः॥२६॥तज्ञातंभृगु
णातत्रदैत्यागमनकारणं कथयामाससभृगुर्गालवायमहात्मने॥२७॥

शृणुगालवसद्बुद्धेयजमानोसिसांप्रतं॥श्वआगंतारइहवैदितिजायज्ञवैरि
णः॥२८॥तस्मादुपायमद्यैवंकर्तुमर्हसि॥इतिश्रुत्वाभृगोर्वाक्य
मृषिगालवदीक्षितः॥२९॥ऋषिसंघसमायुक्तस्तदोपायंव्यचारयत्॥
यद्यस्माकमस्तीहशक्तिर्वैत्यनिषूदने॥३०॥तपसोव्ययभीत्याहितद्धि
कर्तुंनशक्यते॥अथनिष्टशांतिर्हिततोयागोविधीयते॥३१॥तस्मादनिष्ट
शांत्यर्थंप्रतिष्ठाननिवासिनीं॥रेणुकांप्रार्थयिष्यामःसानःकार्यंविधास्यति
३२॥हेरेणुकेसर्वजनैकमातःसमस्तलोकैकनिदानभूते॥सर्वात्मकेस
र्वजनाघहंत्रित्वंपाहिनोदैत्यभयादशेषात्॥३३॥इत्येवंस्तुवतांदेवींसाप्र
त्यक्षीबभूवह॥रेणुकाजगतांधात्रीनानवोचत्सविस्मया॥३४॥मुनयोवो
भयंमास्तुनाशयिष्यामिवोभयं॥कालिकारूपमास्थायहनिष्यामिमहासुरा
न्॥३५॥ततःसाकालिकारूपादैत्यानांभयकारिणी॥आययावृषिभिःसाकं
यज्ञवाटंभयापहा॥३६॥तदैवदैत्यसैन्यानियज्ञवाटंसमाययुः॥कालिकातावि
सैन्यानिसहस्रभुजभूषणा॥३७॥सहस्रैरायुधैर्दिव्यैर्नाशयामासभीषणा॥
कांश्चिच्चखाददंष्ट्राभिहस्त्यश्वरथसैनिकान्॥३८॥अट्टहासेनकांश्चित्सानाशयामासदैत्यान्॥एवंसासर्वसैन्यानिसेनाशयदनेकधा॥३९॥अशि
ष्टास्तुदितिजाःपलायनपरायणाः॥कांदिशिकाबभूवुस्तेतत्कोपावेशतो
सुराः॥४०॥एवंकालिकयासर्वंहतंदैत्यबलंबलात्॥विलोक्यसर्वेमुनयः

तद्व

कालिकामस्तुवन्मुदा॥४१॥ ॥मुनयऊचुः॥ कालिकेत्रिभुवनैकपालिकेसस्म
र्पितकदंबमालिके॥ कस्तूरीतिलकउज्ज्वलभालिकेपाहिनोहिमनगैकबालिके॥४३॥कर्णशोभितसुवर्णताडिकेपारिजातकुसुमाविलालके॥
सकृद्धृतसुराधिनायकेनैजभक्तभजनसौख्यदायके॥४४॥आद्यानमहिषमर्दिनिमातःस्वत्करादुद्यतदैत्यनिपातः॥अस्मदादिसकलारिविघातः
किंशिवेतवमुखंकरुणारुता॥४५॥इतिस्तुतिंसमाकर्ण्यकालिकाविश्वपालिका॥प्रीताद्विजानुवाचाथसमुत्फुल्लमुखांबुजा॥४६॥द्विजाःस्तुत्या
प्रसन्नाहंवरंवरयतेप्सितं॥भवद्भिर्याचतेयद्वैतंकामंपूरयामिवः॥४७॥ए
वंकालिवचःश्रुत्वामुनयोमुदिताननाः॥भक्त्याविनम्रमूर्द्धानोवचनंचेद
मब्रुवन्॥४८॥ मुनयऊचुः॥ ॥कालिकेत्वंप्रसन्नासिवरदानोद्यतासिचेत्
यावद्यज्ञसमाप्तिःस्यात्तावत्तिष्ठशिवेभव॥४९॥निर्विघ्नंकुरुनोयज्ञंभीतानो
यज्ञघातकात्॥अन्यमेकंवरंदेहितीर्थेःस्मिन्व्यापनाद्भुते॥५०॥प्रत्यक्षीभू
तयानोरिघातःकालिकयाकृतः॥त्वयायस्माज्जगद्धात्रीकालिकातीर्थमुत्तमं॥५१॥प्रसिद्धंभवतुत्तत्रस्थिराभवशुभानने॥येऽत्रस्नानंकरिष्यंति
त्वामत्रस्थांचकालिकां॥५२॥पूजयिष्यंतियेभक्त्यातेषांसर्वान्मनोरथा
न्॥परिपूर्णान्कुरुष्वत्वंदेहिनोवरमुत्तमं॥५३॥तथास्त्वितिजगद्धात्रीप्रो
च्चयज्ञंसमापनं॥निर्विघ्नंकारयित्वातुतत्रांतर्द्धानमागमत्॥५४॥गालवो
मुनिवर्योसोसांगयज्ञफलंमुनिः॥अवापकालिकातीर्थेकालिकायाःप्रसा

दतः॥५५॥एवंप्रभावंखलुकालिकायुतंतीर्थंपवित्रंसकलाघहारि॥
यत्स्माननोदर्शनतोपिदेव्याःसर्वेश्चकामानलतेमनुष्यः॥५६॥ ॥लक्ष्मी
पति०॥ ॥शुभंकालिकातीर्थमाहात्म्यमेतत्सदेतच्छृणोतीहयामाधवाख्ये
महादोषहंसर्वकामप्रदायिप्रयत्नांनरैःश्राव्यमेतन्नरैर्वै॥५७॥॥इति
श्रीब्रह्मांडपुराणेप्रतिष्ठानमहात्म्येकालिकातीर्थमहिमावर्णनंनामसप्त
विंशोध्यायः॥ ॥ऋषयऊचुः॥ श्रुतंत्वन्मुखतःसूतकालिकातीर्थमुत्त
मं॥इदानींमिंद्रतीर्थस्यमहात्म्यंवदसादरं॥ ॥सूतउवाच॥ एवंपुरारुतेप्र
श्नेमाधवेनगुरुंप्रति॥ यत्तंलक्ष्मीपतिःप्राहतद्वोवक्ष्यामिसव्रताः॥ ॥
माधवउवाच॥ ॥श्रीलक्ष्मीनरसिंहपादयुगलद्वंद्वैकसक्तांतरश्रीलक्ष्मी
पतिसद्गुरोर्नवमुखाच्छ्रीकालिकातीर्थगं॥माहात्म्यंश्रुतमद्भुतंत्वमधुनाब्रू
हींद्रतीर्थोद्भवंमहात्म्येश्रवणात्समस्तदुरितध्वंसैकदक्षंवरं॥३॥ ॥श्रीलक्ष्मी
प०॥ ॥हेमाधवत्वंशृणुकालिकायास्तीर्थात्तुयाम्येऽखिलसौख्यदायी॥तदी
द्रतीर्थंजगदेककर्त्तृनृसिंहपादांबुजसक्तचित्त॥४॥पुराज्ञातमरवान्कृत्वा
कश्चित्सजीवद्रुद्रतां स्वर्गाधिपत्यतांप्राप्यबुभुजेसुखमुत्तमं॥५॥इंद्रा
णीमतिसौंदर्यवतींप्रापमनोहरां॥ऐरावतंपारिजातंमश्वसप्तसुखंतथा
६॥रंभाद्यप्सरसाजातंमवाप्यमुमुदेचसः॥अनिघ्नविषयावास्याश्रीमदां

धोवभूवह ॥७॥कदाचिदैरावतगेस्फरेशेविमानयानेषुस्रोत्तमेषु॥वैनाल्किकेषुप्रप
ठत्सकीर्तिनदत्सतूर्यघसमनोहरेषु॥८॥नृत्यत्सुचैवाप्सरसांगणेषुमहोत्सवेले
स्वपुरेप्रवृत्ते॥पुराग्र्यवीथीषुमहोत्सवेनसमागतेसर्वसुरैकनाथे॥९॥अस्मिन्नव
सरेनृवसमागान्नारदोमुनिः॥भक्तैरर्पितकंठरुदिव्यमाल्यविभूषणः॥१०॥आका
शमार्गेणयातोवासवेननमस्कृतः॥वासवंसर्वसंपन्नंदृष्ट्वासंतुष्टमानसः॥११॥
स्वकंठरुजांददौमालांवासवायसनारदः॥सामालांमदमत्तोसौगजगंडस्थलेक्षि
पत्॥१२॥गजोपिधिक्करेरुत्वाचरणस्यतलेक्षिपत्॥ऐरावतःस्वपादेननामालां
मर्दयद्भृक्षणात्॥१३॥तांमालांमर्दितांदृष्ट्वानारदःक्रुद्धमानसः॥उवाचवासवंम
न्तंमालायज्ञानकारिणम्॥१४॥मदोन्मतोसिमदात्मन्तवजातासिमायतः॥ततोत्रै
शास्तुराज्यस्यमत्तस्यात्यथवर्तितः॥१५॥अज्ञानाद्ब्राह्मणावज्ञापापान्नृगनृपस्यवै
स्फलासत्वमभवत्तथायेयादवान्वये॥१६॥द्विजावज्ञानतोजातोमुद्गलस्यप
देशतः॥आकस्मिकश्चसंहारोयादवानांभयावहः॥१७॥तथासर्पत्वमापाहो
नहुषोद्विजहेलनात्॥तस्मात्त्वमुन्मादफलंभाग्यसेनरयेनहि॥१८॥शुभंवाप्य
शुभंकर्मकृतंकर्त्रैवभुज्यते॥इत्युक्तानारदःक्रोधान्नयथागतमार्गतः॥१९॥
गतेचनारदःशक्रःपर्यटिलासससंभ्रमः॥ग्रहंजगामनिजंसपरमैश्वर्यमोहितः॥
२०॥सविस्मृत्यैयथापूर्वमवर्तत॥एवंगच्छकलिचिद्दिवसेषुबलात्करः॥दैत्य
सेन्याधिपोत्यंतबलवानतिकोपनः॥स्वत्रादीन्निहतांश्रुत्वादैत्यान्श्रेष्ठपरा
क्रमान्॥२२॥नानोपायैःस्वजातीयानिर्द्वेषात्करवैरिणः॥स्वजातीयसपालित्व

दैत्यापचितिकामुकः॥२३॥इंद्रंहंतुंसरत्नोसावागाद्देवपुरींप्रति॥नावासेब्धेरथा
काशंकुर्वन्निरवकाशवत्॥२४॥दैत्यानीकंविलोक्याथशक्रस्यबलसंयुतः
निर्यायाधमरारत्याःसकाशाद्बहिरोजसा॥२५॥सहैवदेवनिचयैर्गृहीतप
रमायुधैः॥ततःसमभवद्युद्धंदेवदेवारिसेनयोः॥२६॥अत्यंततुमुलंनाना
भीषणायुधसंचयैः॥समर्थेघपिदेवेषुदैत्यसैन्यात्पराभवः॥२७॥ब्रह्मशाप
स्यबलवांस्तस्मान्नारदशापतः॥महाबलयुतेशक्रेतेदेवाभूत्पराभवः॥
२८॥देवाःसर्वेपराभूताःसावरोधाःसवासवाः॥पुरोहितेनसहिताययुर्मे
रुदरींप्रति॥२९॥बलासुरेऽमरावत्यांसिंहासनगतेऽधिपे॥सुरासुरानरुद्दै
त्यानांपारपत्यंप्रकुर्वति॥३०॥हीनभूताःसुराःसर्वेसुवर्णाद्रिदरींगताः॥स्वका
लक्षपणंचक्रुःसुदीनामनुजायथा॥३१॥एवंकालेगतेखेदाद्देवानांदेवनाय
कः शक्रःस्वगुरुमाष्टछद्बृहस्पतिमुकल्मषं॥३२॥बृहस्पतेसुराध्यक्षत्वयि
तिष्ठतिनोधिपे॥दीर्घकालंप्रभोदैन्यंकिन्निमित्तंमिदंवद॥३३॥ ॥बृहस्प
तिरुवाच॥ ॥यथायेनकृतंकर्मपुण्यंवापापमेववा॥तच्छुभंतेनभोक्तव्यं
नात्रकार्याविचारणा॥३४॥क्षणात्त्वमंधोभवसिमहदैश्वर्यमोहितः॥
प्राज्ञस्तत्कर्मकुर्वीतयेनांतेसुखमेधते॥३५॥अविचार्यत्वयायस्मात्क्रो
धतेकर्मगर्हितं॥तस्यदृष्टफलंतेहिप्राप्तंभवतिनिश्चितं॥३६॥एवमुक्तेतुगुरु
णातुप्रत्याहशचीपतिः॥स्वामिन्ममापराधोवैक्षंतव्योऽज्ञानतःकृतः॥३७॥

ब्रूहीदानीमुपायंतंयेनराज्यमवाप्नुयां॥बृहस्पतिःकृपाविष्टोदेवेंद्रंपुनरब्रवीत॥३८॥अन्योपायंवदिष्यामित्वामेकंशक्रराज्यदं येनोपायेनचीर्णेनराज्यप्राप्तिर्भविष्यति॥३९॥गोदोदकृतटसंज्ञेऽभिप्रतिष्ठानाभिधंपुरं॥सर्वतीर्थोत्तमंतातसर्वसेव्योत्तमोत्तमं॥४०॥यत्रेशसंज्ञेऽभितंनानातीर्थैस्तद्भूतदेवते॥तत्रत्वंकालिकातीर्थाद्दक्षिणस्यांमहामते॥४१॥लिंगंस्वनाम्नामुत्थाप्यतदाराधयेयत्नतः॥तस्मिन्प्रसन्नेसर्वेशेवैरिनाशोभविष्यति॥४२॥राज्यप्राप्तिश्चदेवेशासत्यत्वंतेभविष्यति॥इदींद्वरयायाहिप्रतिष्ठानंपुरोत्तमं॥४३॥एवमुक्त्वागुरुणामघवाशीघ्रमेवहि॥प्रतिष्ठानपुरंप्रागाद्गुरुणासहबुद्धिमान्॥४३॥प्रतिष्ठानंसमागत्यतीर्थेषुकृतमज्जनः देवताश्चार्पिसंपूज्यतत्तत्तीर्थंगतास्तथा॥४५॥ततोवैकालिकातीर्थाद्दक्षिणस्यांकृताभयः लिंगंस्वनाम्नासंस्थाप्यगोदातीरेविशुद्धधीः॥४६॥तद्ग्रेतपउग्रंवैवाय्वाहारोजितेंद्रियः॥गंगात्रिगवपरं स्नानश्चकारपरमादरात्॥४७॥षण्मासमेवतपसि कृतेदेवोमहेश्वरः लिंगेप्रादुर्बभूवाहोशक्रानुग्रहकारकः॥४८॥तस्मिन्प्रत्यक्षतापन्नेपार्वतीप्राणनायके॥साष्टांगंमघवातस्मैप्रणनामादरान्वितः॥४९॥अस्तोषीद्देवदेवेशंकैलासनिलयंविभुं॥अत्यंतकोमलैर्वाक्यैःश्रोत्रचित्तसुखावहैः॥५०॥ ॥इंद्रउवाच॥ ॥त्रिभुवनपरिपालश्रीमहेशानदेवत्रिदशनिकरपूज्याजस्रपादारविंद॥त्वमसिसकलकार्यस्यादितोनूनंपरात्मंस्त्वयिसकलमपीदंभासतेलोकजातं॥५१॥त्वमेवसर्वामरवंदनीयस्त्व

डाक्टर भाऊदाजी दृश्यश्राव्यसंग्रहालय

स्त्वमेवसर्वागमचिंतनीयः॥त्वमेवसर्वर्षिविभावनीयस्ततोभवंतंप्रणतो॥स्मिनित्यं॥५२॥नित्यानंदचिदेकतानविमलस्वीयप्रकाशाहतध्वांतचराचरानुग्रपरानंदस्वरूपोहियः॥५३॥भक्तानुग्रहसंधृताखिलजनध्यानार्हलीलातनुस्तंनित्यसुखानुभूतिममलंवेदैजगन्नायकं॥५३॥इतिस्तुतिंसमाकर्ण्यजगदासेंद्रकल्पितां॥प्रोवाचवचनंतस्मैवरंब्रूहितिसादरं॥५४॥इतिशंभुवचःश्रुत्वावरमिंद्रोह्ययाचत॥देवदेवप्रसन्नोसियदिदेवकृपानिधे॥५५॥बलघ्नमथनेत्वंभोसामर्थ्यंदेहिमेविभो॥नष्टंराज्यमखिलंममदेहिकृपानिधे॥५६॥इतींद्रवचनंश्रुत्वासर्वात्माशंभुरब्रवीन्मत्पादरजसाशक्रकथंचपरिकल्पय॥५७॥तेनत्वंबलनामानंरणेदैत्यंहनिष्यसि॥स्वराज्यंप्राप्स्यसेशीघ्रंनात्रकार्याविचारणा॥५८॥इतिशंभुवचःश्रुत्वाशक्रस्तत्पादधूलिभिः॥कवचंस्वशरीरेवैचकारपरमादरात्॥५९॥पुनश्चप्रार्थयामासशंकरंपरमादरात्॥अत्रेंद्रतीर्थेयेस्नातिदृष्ट्वेशंवायजंतिये॥६०॥तेषांकामान्पूरयस्वस्थिरोभवजगत्पते॥तथेत्यूचेजगत्स्वामीलिंगेनर्धानमास्थवान्॥६१॥श्रीशंभुपादरसाकृतवज्रदेहोवज्रायुधोऽभ्यगमदाशुबलंबलाढ्यः॥६२॥वज्रेणशत्रुमतिवेगवताजघानसद्यःपपातविबलोबलनामधेयः॥६३॥प्राप्तोमरावतींशक्रःपुनश्चस्वबलैर्युतः॥यथापूर्वमवापर्धेशंकरानुग्रहाद्दृढं॥लक्ष्मीपः॥माधवेषसकलाघहरःकः शक्र

तीर्थमहिमानुवर्णितं॥यत्कथाश्रवणतोपिपापतः सर्वसौख्यमतुलंचविंदति॥
६४॥ ॥इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमहात्म्येइंद्रतीर्थमहिमावर्णनामा
ष्टाविंशोध्यायः॥ ॥ऋषयऊचुः॥ ॥सूतत्वन्नुखलुस्त्विंद्रतीर्थाख्यानंमहा
द्भुतं॥अधुनानागतीर्थस्यमाहात्म्यंवदसुव्रत॥१॥ सूतउवाच॥ ॥माध
वेनपुरापृष्टोलक्ष्मीपत्यभिधेगुरौ॥सतंयदाहमाहात्म्यंतच्छृणुध्वंमुनीश्व
राः॥२॥ ॥माधवउवाच॥ श्रीमन्नृसिंहपदपंकजचंचरीकलक्ष्मीपतेन
वमुखाच्छ्रुतमिंद्रतीर्थं॥साख्यानमद्भुततमंत्वमधुनावदाशुश्रीनागती
र्थमहिमानमतीवपुण्यं॥३॥ ॥लक्ष्मीपतिरुवाच॥हेमाधवत्वमसिशुद्धमतेः
सत्वैषायस्मान्मतिः श्रवणलालसतामवाप॥इंद्रतीर्थमहिमानमतिप्र
शस्तंश्रीनागतीर्थमहिमानमतोवदिष्ये ४ एवमेवपुरापृष्टोनारदेनपिना
महः॥तन्नागतीर्थमाहात्म्यंयदाहश्रृणुतद्दृढं॥५॥ब्रह्मोवाच॥नागती
र्थमितिख्यातंश्रृणुतस्यापिविस्तरं॥यत्रनागेश्वरोदेवःसर्वकामफलप्रद-
॥६॥प्रतिष्ठानपुरेराजाशूरसेनइतिश्रुतः॥सपुत्रार्थंमहादानमकरोत्स्त्रि
ययामह॥७॥तस्यपुत्रश्चिरादासीत्सर्पोवैभीषणाकृतिः॥तंपुत्रंपोषया
मासशूरसेनोमहीपतिः॥८॥राजपुत्रःसर्पइतिनकश्चिद्वेदतेजनः॥अवरोध
पुरेतंचमातरंपितरंविना॥९॥धात्रेयीकापिजानातिनामात्यानपुरोहितः
तंदृष्ट्वाभीषणंसर्पंसभार्योनृपसत्तमः॥१०॥संतापंनित्यमाप्नोतिसर्पाहूर
मपुत्रसा॥गृहमध्येमहासर्पोभक्तिनित्यंमनुष्यवत्॥११॥सर्पःस्वपिते

रंप्राहकुरुचूडादिकांक्रियां॥तथोपनयनंवापीवेदाध्यायनमेवच॥१२॥
यावन्नाधीयतेवेदान्तावच्छूद्रोद्विजस्मृतः॥तत्पुत्रोवचनंश्रुत्वाशूरसेनो
तिदुःखितः॥१३॥ब्राह्मणंकंचिदानीयतस्यसंस्कारानकारयत्॥अधीतवे
दःसर्पोपिपितरंत्वब्रवीद्वच॥१४॥विवाहकर्महितातममत्वंकुरुनिर्भयः॥
अन्यथापिष्टकल्पेनसिध्येदितिमेमतिः॥१५॥कृतसंस्कारपुत्राणांसर्वे
षांचविवाहिनां॥नकुर्याच्चपितातस्यनरकान्नास्तिनिष्कृतिः॥१६॥विस्मितो
सपितात्राहत्वंसर्पोस्यान्नीषणः॥यस्यशब्दादपित्रासमायातिसकलाःप्रि
तस्मैकन्यांतुकोदद्याद्दृदपुत्रकरोमिकिं॥तेपितृवचनंश्रुत्वासर्पःप्राहविचक्ष
णः॥१८॥विवाहाबहुधाराजन्नाज्ञांसंतिसधर्मकाः॥प्रसह्याहरणंचापिश
त्रैर्वैवाहिकंतथा॥१९॥जातेविवाहेपुत्रस्यपितासोकृतकृद्भवेत्॥नोचेवम
त्रगंगायांमरिष्येनात्रसंशयः॥२०॥तत्पुत्रनिश्चयंज्ञात्वाब्रवीन्नृपसत्तमः
विनिश्चयंब्रूहिजामात्यानाहूयेदंवचोब्रवीत्॥२१॥नागेश्वरोममसुतोयुवा
राजगुणान्वितः॥गुणवान्मतिमांछूरोदुर्जयःशत्रुतापनः॥२२॥यथेनागेश्वर
स्तुर्षाविद्ययानोपमीयते॥विवाहस्तस्यकर्त्तव्योममवद्भवमेवच॥२३॥राज्य
भारंकृतेन्यस्यनिश्चिंतोहंभवाम्यतः॥नदारसंग्रहोयावत्तावत्पुत्रोममाप्नि
यः॥२४॥बालभावान्नजानातितस्मात्सर्वेनुमन्यत्व॥विवाहार्थंप्रकुर्वंतु
यत्नमस्यहितेरताः॥२५॥नमेकाचित्तदाचिंताकृतोद्वाहेवदामजः॥

सतेन्यस्तधरायांतिरूतिनस्तपसेवनं॥२६॥अमात्याराजवचनंश्रुत्वासर्वेविनीतवृ
त्॥ऊचुःप्राजलयोहर्षाद्राजानंभूरितेजसं॥२७॥तवपुत्रोगुणश्रेष्ठस्तेचसर्व
त्रविश्रुतः॥विवाहेतवपुत्रस्यकिमुन्नोकास्तिवै॥२८॥आमात्येषुतथोक्तेषुगंभी
रोनृपस्तदा॥पुत्ररूपममात्यानांनचाचख्यानतोविदुः॥२९॥राजापुनस्तानुवा
चकावाकन्यागुणाधिका॥महाबलाधरःश्रीमान्कोवाराजागुणान्वितः
३०॥संबधयोग्यःशूरश्चयत्संबंधःप्रशस्यते॥तद्राजवचनंश्रुत्वातदामात्याः
सुबुध्ययः॥३१॥कुर्लीनाःसाधवोऽत्यंतराज्ञोऽत्यंतहितेरताः॥तन्मध्येबुद्धि
मान्कश्चिप्रधानोराजसत्तमं॥३२॥राज्ञोमतिंविदित्वाचिंगितज्ञोब्रवीदिदं
पूर्वदेशेमहाराजाविजयोनामभूपतिः॥३३॥वाजिवारणरत्नानांयस्यसं
ख्यानवियते॥अष्टोपुत्रामहेष्वासामहाराजस्यधीमतः॥३४॥तेषांभोगव
तीसाक्षाल्लक्ष्मीरिवापरा॥तवपुत्रस्यसायोग्याभार्याराजन्मयोदिता
३५॥वृद्धामात्यवचःश्रुत्वाराजानंप्रत्यभाषत॥सुतातस्यकथंमेस्या
त्सुतस्याभुवदस्यतत्॥३६॥॥वृद्धामात्यउवाच॥राजंस्तवापिसत्कीर्ति
श्रुत्वाशौर्यगुणाश्रयां॥त्वत्पुत्रायस्वदुहितांविजयोदास्यतिध्रुवं॥
३७॥श्रुत्वाप्रधानवाक्यंसभूषणाच्छादनोक्षिप्तः॥संपूज्यप्रेषयामा
समहत्यासेनयासह॥३८॥सोगाच्छनैःपूर्वदेशंतंराजानंसमेत्यच॥सं
पूज्यविविधैर्वाक्यैरुपायैर्नीतिसंभवैः॥३९॥महाराजसुतायास्तोभो

भोगवत्यामहामतिः॥शूरसेनस्यनृपतेःसुतोयोग्योहितीधीमतः॥४०॥विवा
हायाकरोत्संधिर्नानामिथ्यावचोक्तिभिः॥अवाप्यपूजांनृपतेर्गजवाजिधना
न्वितः॥४१॥ततआगत्यराज्ञेवैवृद्धामात्योन्यवेदयत्॥शूरसेनायवृत्तांते
वैकाहिकमथाकरोत्॥४२॥ततोबहुतिथेकालेवृद्धामात्योमहामतिः पुन
र्बलेनमहतावस्त्रालंकारभूषितः॥४३॥जगामततसोर्वेचचिवैःपरिवा
रितः॥विजयायमहाप्राज्ञोमहाराजायबुद्धिमान्॥४४॥सर्वैर्मानाचरद्भो
सोप्रधानःसचिवैर्वृतः॥अत्रागतुंनचमतिंशूरसेनस्यभूपतेः॥४५॥पुत्रोनाग
इतिख्यातोभविताचास्यवःसुतः॥क्षत्रियाणांविवाहास्त्रावंतिबहुधानृ
प॥४६॥ब्राह्मणाःक्षत्रियाश्चैवसत्यांवाचंवदंतिच॥तस्माच्छस्त्रैरलंका
रैर्विवाहस्त्वनुमन्यतां॥४७॥वृद्धामात्यवचःश्रुत्वाविजयोराजसत्तमः॥मेने
वाक्यंचतत्सत्यंवृद्धामात्यस्यभूपतिः॥४८॥विवाहमकरोद्राजाभोगवत्या
सुविस्तरं॥हस्त्यश्वधनरत्नैश्चयथाशास्त्रंप्रेषयामाससोपुनः॥४९॥स्वानमात्यां
स्तथागाश्चहिरण्यतुरगादिकं॥बहून्यन्यानिविजयोददौबहुमुदान्वितः॥
५०॥तामादायप्रधानायनरमाल्यपुरोहिताः॥प्रतिष्ठानंसमभ्येत्यशूरसे
नायतांस्तुषां॥५१॥न्यवेदयंस्त्वथोचुस्तेविजयस्यवचोबहु भूषणा
निविचित्राणिददुर्वस्त्राणिकांचनं॥५२॥निवेद्यशूरसेनायकृतकृत्या
बभूविरे॥विजयस्यसदामात्याभोगवत्यासमागताः॥५३॥संपूजयित्वा

राजामोबहुमानपुरःसरं। विजयायययथार्घानितथामात्यान्व्यसर्जयत्।।
६९ ।९४। निजयरयसकताबालारूपयौवनशालिनी।श्वश्वश्वशुरयोःसेवांकुर्वे
तीसमतिष्ठत।।९९।।बालायाभोगवत्यास्तुभर्त्तासर्पोऽतिभीषणः।।एकांत
देशेविजनगृहेरत्नस्फुरोज्ज्वलिते।।९६।।स्फुरंधकुसुमाकीर्णेतल्पास्तरणशो
भिते।।सुप्तोमांतरमाहृपितरंचपुनःपुनः।।९७।।ममभार्याराजपुत्रीकिंमां
नैवोपतिष्ठति।।तुत्सर्पवचनंश्रुत्वासर्पमातेदमब्रवीत्।।९८।।धात्रेयीभोगव
तिंगत्वाशीघ्रंहिनद्द।।तवभर्त्तासर्पइतितत:साकिंवदिष्यति।।९९।।धात्रे
यीवचनंश्रुत्वाभोगवतींप्रति।।एहोगतेत्युवाचेदमभीतवदपूर्ववत्
।।१००।।जानेहंसुभगेभद्रेभर्त्तारंतवदेवतं।।नकस्यचित्त्वयाख्येयंसर्पोन
पुरुषोध्रुवं।।१०१।।तस्यास्तद्वचनंश्रुत्वाभोगवत्याब्रवीदिदं।। भोगवत्युवाच
मानुषाण्णंमनुष्योहिभर्त्तासमतरोभवेत्।।१०२।। किंपुनर्देवजातिस्तुभर्त्ता
पुण्येनलभ्यते।।१०३।।भोगवत्यास्तुतद्वाक्यंसाचसर्वान्यवेदयत्।।सर्पा
यसर्पमाचेचन्यवेदयत्।।१०३।।रुरोद्राजातद्वाक्यात्श्रुत्वातोक्रमेणोग
तं।।भोगवत्यपितांप्राहप्रोक्तपूर्वंपुनःसर्वं।।१०४।।तंदर्शयभद्रंतव
थायातिवयोमम।।ततःसादर्शयामाससर्पंमतिभीषणं।।१०५।।स्फुरंध
कुसुमाकीर्णशयनस्थंरहोगतं।।तंदृष्ट्वाभीषणंसर्पंभर्त्तारंमतिभीषणं
१०६ कृतांजलिपुटावाक्यमब्रवीत्कांतमंजसा।।धन्यास्म्यनुगृहीतास्मिय ९९
स्यांमेदेवतपतिः।।१०७।।इत्युक्त्वाशयनंत्यक्त्वातंरसर्वंसर्वभाननेः।।खेल

ल्यामासचार्वंगीशंतितेःश्वेतरसंगमैः।।१०८।।स्फुरंधकुसुमैःपानैस्तोष
यंतात्वहर्निशं।।तस्याएवप्रसादेनसर्पस्याभूत्स्मृतिर्मुने।।१०९।।स्मृत्वासर्वंदे
वकृतंराज्ञीसर्पाब्रवीद्धितं।।तंहिराजकन्येमांदृष्ट्वानीतासिकंप्रिये ११०
मारुरुक्षुरगोभुवनाभिरामः॥६६॥सोगत्वासीतासमवेतआद्यस्तथोसनं
त्रेवजगन्निवासः॥६७॥तत्रनिकटकान्हत्वाखरत्रिशिरदूषणान्॥राव
णानुचरांस्तत्रचतुर्दशसहस्रपान्॥६८॥तैःसाकंसंगरंकृत्वाताञ्सर्वान्
हनत्प्रभुः॥रावणस्यानुजांतत्रकपटस्त्रीस्वरूपिणीं॥६९॥दृष्ट्वातांचसरो
षंतुनत्नासामक्षिनद्दरान्॥सक्षिन्ननासातुनिशाचरीगतालंकांदशा
स्यायनिवेदयद्दशा॥ क्रुतांरघूणामधिपेनधन्विनाज्ञात्वासरोषंदुःसमभू
द्दशाननः॥७०॥दृष्ट्वाविनासोभगिनींश्रुत्वाविरक्षसांवधं॥सचेरामज
योपायंव्यचारयदनेकधा॥७१॥मारीचिंमंत्रिणंरक्षः समाहूयाब्रवीद्व
चः॥मारीचत्वंमृगोभूत्वाजनस्थानगतोभव॥७२॥त्वच्चमणिप्रभयु
क्तारसीताकांतंवरिष्यति॥ततश्चकंचुकींस्वामिन्द्दछांमित्वमिमंजहि
७३॥ततस्त्यक्तोहिरामस्त्वामनुयास्यतिसादरं॥सीतारक्षणार्थाय
लक्ष्मणंस्थापयिष्यति॥७४॥रामबाणविनिर्भिन्नस्त्वमुच्चैःकुरुशब्दितं
हालक्ष्मणातिरुतोच्चारलक्ष्मणोपिगमिष्यति॥७५॥सीतामेकाकिनींदृष्ट्वातांजहारदशाननः॥तांनिहत्यमारीचिंजनस्थानसमा
तौ॥७६॥अदृष्ट्वाजानकींखिन्नावभूतांरामलक्ष्मणौ॥तौतच्छुद्धिंप्र
कुर्वाणावनुगोदंप्रजग्मतुः॥७७॥पुण्यस्तंभादितीर्थेषुमुनीन्दृष्ट्वाप्रण
म्यच॥सीतांगवेषयंतौतावग्रेचैवप्रजग्मतुः॥प्रतिष्ठानंसमागम्यस्नात्वा
भोगवतीजले॥सिद्धेश्वरंपूजयित्वासंतोषंप्रापतुःपरं॥७९॥प्रदक्षिणं
प्रकुर्वंतौग्रामंगोदातटेशुभे॥अमृतार्थादक्षिणस्यांवासंचक्रतुरादरात्॥
८३॥श्रीरामालोकबीक्षायेस्वनाम्नालिंगमुत्तमं॥स्थापयित्वातपस्तेपेसीता
स्थानाबुभूतये॥८४॥श्रीरामतपसाशंभुर्लिंगेप्रत्यक्षतांगतः॥श्रीरामः
शिवमभ्यर्च्यतोषंसंतोषाद्दत्तमानसः॥८५॥ ॥श्रीरामउ०॥ ॥स्फटिकरकि
रीटप्रोतमाणिक्यदीप्तिप्रविलसदमलांघ्रभूतिरालेपरागं॥दशभुजनिगृ
हीत्यद्भुतप्रोदहेतेत्रिजगदधिपशंभोदेवमह्यंप्रसीद॥८६॥निजपद
भजनैकारक्तचित्तार्थबंधोभवजलधिनिमग्नस्वीयकारुण्यसिंधो
जगपतिवरचर्मप्रावृताधोविभागत्रिजगदधिपशंभोदेवमह्यंप्रसीद॥
८७॥त्रिभुवनकमनीयाकारपृथ्वीध्रकन्यामुखकमलविलोकासक्त
चक्षुःसमूह॥कृतसकृतभुजंगाभूषणांगत्रिनेत्रत्रिजगदधिपशंभो

देवमत्यंप्रसीद ॥८८॥इतिश्रुत्वास्तुतिंरम्यांश्रीरामेणप्रकल्पितां॥श्री
शोगुःकरुणासिंधुःश्रीरामंप्रत्युवाचह॥८९॥श्रीशंगुरुरुवाच॥ ॥
प्रसन्नोहंजगन्नाथश्रीरामरुरपूजित॥ अपक्षितंयाचनीयंदास्यतन्ना
त्रसंशयः॥९०॥त्वत्स्वरूपंहिजानंतिमोहितामायायातव॥त्वंहिसाक्षात्परंब्र
ह्मयद्ध्यायंदुरात्मभिः॥९१॥रमंतेयोगिनोरामेसत्यानंदचिदात्मनि॥
इतिरामपदंत्वंपरंब्रह्माभिधीयसे॥९२॥लीलाविधृतदेहोसित्वंक
र्मनिबंधनः॥सच्चिदानंदरूपस्त्वंनित्यमुक्तस्वभाववान्॥९३॥किंयाचय
मिदंवेशतद्दश्रीरघूत्तम॥इतिशंभोर्वचःश्रुत्वाश्रीरामस्तमथाब्रवीत्
॥९४॥केनसीतादृतेश्चैनैवविज्ञायतेमया॥तन्मार्गंदर्शयस्वाशुयत्रसीता
हिवर्तते॥९५॥इतिरामप्रयुक्तोसौशिवोराममथाब्रवीत्॥नसीताविष
येकार्याचिंतारामाण्वपित्वया॥९६॥त्वत्सायंकरिष्यामिह्यहंवानररूप
धृक्॥सर्वोर्ग्रादिमहावीरकोटिवानरयूथपः॥९७॥त्वंमत्सहायोदेव
शापरवारांनिधोहृदे॥सेतुंकरिष्यसिस्वामिन्नद्भुतंसरदुष्करं॥९८॥त
न्मार्गेणाशंख्यकीशसंघसैन्यसमावृतः॥हत्वात्वंसपरीवारंरावणंरा
क्षसेश्वरं॥९९॥स्वशक्तिंप्राप्यसेरामसीतांत्रैलोक्यसुंदरीं॥अभिनंद्ये
त्थमाशीर्भीरामस्यवपश्यतः॥१००॥अंतर्धानमगाद्विप्रंशंभोरामश्शाभि
धानकः॥ततोरामःशिवाज्ञप्तिर्युक्तोग्राभिजगामह॥१०१॥ऋक्षवानर

संघेनयुक्तश्चापिहनूमता॥दशयोजनविस्तीर्णंशतयोजनमायतं॥१०२
सेतुंबध्वाहृदंरामःशिलाभिरमितद्युतिः॥तेनमार्गेणगत्वाहिलंकांरावण
माहवे॥१०३॥हत्वारामःकपिसंघसहितःसीतयान्वितः॥अयोध्यांक
पिसैन्येनगतोसौसविभीषणः॥१०४॥ततोराज्याभिषिक्तोसौभरता
दिनिषेवितः॥विभीषणंचरक्षोवंश्यस्वसैन्यसमावृतं॥पूजितंप्रेषया
मासराजधानींस्वकांस्वकां॥यत्रलिंगंस्थापयित्वाशिवादिष्टपथानि
जां॥१०६॥सीतामापरघुश्रेष्ठःशंभुसाहाय्यमास्थवान्॥ततःप्रभृतित
त्तीर्थंप्रतिष्ठानाभिधेपुरे॥१०७॥रामतीर्थमितिख्यातंगोदायामुत्त
रतटे॥यत्रस्नात्वाचहुत्वाचपित्रृणांचापितर्पणात्॥१०८॥किंचिद्दत्वामहा
बुद्धेविष्णुलोकेमहीयते॥अत्रश्रीरामनवमीदिनेस्नानादिकारकः
॥१०९॥रामंशंपूज्यविधिवत्सर्वान्कामानवाप्नुयात्॥११०॥ ॥श्रीलक्ष्मी
पति०॥ ॥हेमाधवत्वांप्रतियन्मयोक्तंश्रीरामतीर्थस्यमहामहित्वं॥शृणो
तियःश्रावयतेचभक्त्यासविष्णुलोकेव्रजतेमनुष्यः॥१११॥ इतिश्री
ब्रह्मांडपुराणेप्रतिष्ठानमहात्म्येरामतीर्थमहिमावर्णनेनामचतुस्त्रिं
शोध्यायः॥ ॥ऋषयऊचुः॥ ॥ततस्त्वन्मुखतःश्रीमद्रामतीर्थक
थाश्रुता॥इदानींवदसद्भद्रकालीतीर्थकथांशुभां॥१॥सूतउवाच॥ ॥एव
मेवपुरापृष्टामाधवेनस्वयंगुरुः॥लक्ष्मीपतिस्तंयच्चाहतदाख्यानव

वदाम्यहं ॥२॥ ॥माधवउ०॥ ॥श्रीमन्नृसिंहाद्यनुरक्तसन्मनेलक्ष्मीप
तेत्वन्मुखतःश्रुतामया॥श्रीरामतीर्थीयकथावदाधुनाश्रीभद्रकालीव
रतीर्थसत्कथां॥३॥ ॥श्रीलक्ष्मी०॥ ॥हेमाधवत्वंशृणुसावधानमनाः
परंश्रोतृसुखप्रदायकां॥ श्रीरामतीर्थोत्तरमुत्तमोत्तमाश्रीभद्रकाली
वरतीर्थसत्कथां॥४॥अत्रेतिहासंवक्ष्यामिपरमाश्चर्यकारकं॥यस्यश्रवण
मात्रेणधर्ममतिमवाप्नुयात्॥५॥एकंसाराष्ट्रदेशेस्तिसोमपट्टणमुत्तमं
यत्रश्रीसोमनाथोहिदेवोदेवोविराजते॥६॥समुद्रतीरेयल्लिंगंदृश्यंदि
व्यमुच्यते॥यत्रपूर्वोक्तवह्निर्वैपिप्पलादेननिर्मितं॥७॥वाडवोनामनिष्ठि
तःसरस्वत्याहिसागरे॥तस्माद्भुविप्रसिद्धंतद्वह्नितीर्थंमहाफलं॥८॥
हिरण्याख्यानदीयत्रसागरेणचसंगता॥यत्रैरकास्वरूपेणमोद्वारीपो
रमोऽभवत्॥९॥मुनिभिःपरिज्ञातोयादवानांविनाशकः॥इच्छयावासुदे
वस्यब्रह्मण्यस्यामितौजसः॥१०॥ ॥माधवउ०॥ ॥यादवानांकथंशापोजा
तःकृष्णानुवर्तिनां॥स्वामिन्निमांछिंधिशोकांशिष्यसंशायवारकां॥११॥
श्रीलक्ष्मीपति०॥ ॥अत्रेतेकथयिष्यामिद्वारकीयांकथांशुभां॥ यस्याः श्र
वणमात्रेणसर्वपापैःप्रमुच्यते॥१२॥द्वारकायांपुराकृष्णेदेवेराज्यंप्रकु
र्वति॥यौवनाश्विजनद्रव्यमदमत्ताहरेःप्रजाः॥१३॥क्रीडतोदृष्टभुक्त
वंतस्तीर्थसंज्ञितान्॥विधायसोवर्त्मविषंतेषुन्यप्रच्छुरादरात्
॥१४॥स्वामिन्प्रथमगर्भोयंयूष्मान्प्रष्टुमुनीश्वराः॥पृच्छत्यस्मन्मुखद्वारा
स्यादरेकिंभविष्यति॥१५॥कन्यावाप्यथापुत्रोवानद्भवद्भिःप्रकथ्यतां॥

तत्तेषांकपटंज्ञात्वामुनयःकृपयान्विताः॥१६॥तूष्णींभूताबभूवुस्तेन
किंचिदपिचाब्रुवन्॥पुनःपुनश्चप्रलुर्यदायदुकुमारकाः॥१७॥
भवितव्यानुरूपस्तेनकिंचिदपिचाब्रुवन्॥नकुमारीकुमारोवाह्येतज्जठर
गोभवेत्॥१८॥भविष्यतिदुराचारामुशलंकुलनाशनं॥एवंश्रुत्वामु
नीनांवैवाक्यंयदुकुमारकाः॥१९॥सांबोदरंतेमुमुचुस्तत्रापश्यन्नयस्मयं
मुशलंभयसंविग्नाबभूवुःसकलाअपि॥२०॥ततोमुशलमादायसभा
यांजग्मुरार्त्तिदं॥अत्यंतभयसंविग्नाःश्रीकृष्णेतेव्यजिज्ञपन्॥२१॥कृना
गसांवयंप्राप्ताःस्वामिन्ब्राह्मणपुंगवैः॥तेषांशापस्त्विदंदेवमुशलंकुल
नाशनं॥२२॥तच्छ्रुत्वाभगवान्कृष्णोजहासांतर्विचारयन्॥यदस्माकमनु
द्दिश्यब्राह्मणैस्तदनुष्ठितं॥२३॥इतिमत्वातानुवाचभवितव्यामितुःखलु द्
र्दैवात्वासिंधुतीरेघर्षणीयंदृषत्कवै॥२४॥क्षीणेऽस्मिन्मुशलेनयमुपा
यांद्वाभयंनहि॥यथाविभागंसर्वेषांशापंसंक्रामयन्हरिः॥२५॥मुशलो
त्कर्षणोत्पन्नफेनोत्पन्नैरकाख्यतः॥स्वल्पोकाभासयेतेषामुत्पातान्
दर्शयन्मुहुः॥२६॥मोक्षदोद्वारकायास्तान्वहिर्निःकाश्यमाधवः॥मु
शलोत्कर्षणारसःसमुद्रलहरीवशात्॥२७॥गतःप्रभासेनद्यासीदेरका
रूप्यहोशिशुः॥भूभारापहरःकृष्णस्तत्रानीयसयादवान्॥२८॥अन्यो
न्यंकलिमुत्पाद्यनाशितास्तेनयादवाः॥षट्पंचाशत्कोटिसंख्ययादवानां
विनाशनं॥२९॥यत्रजातंतत्प्रभासक्षेत्रवर्यंप्रचक्षते शिवेविष्णोःप्रकर्षेण

यत्रस्थंप्रभासते ॥३९॥तत्यभासमितिप्रोक्तंभुक्तिमुक्तैकसाधनं॥तस्मि
न्क्षेत्रेद्विजःकश्चिन्मणिभद्राभिधोत्वभूत्॥३१॥कालेनतस्यद्वौपुत्रावास्ता
मतिसुलक्षणौ॥सुभद्रभद्रनामानौस्वस्वकर्मवशानुगौ॥३२॥सताबध्या
पयामासगणिभद्रस्तयोःपिता॥तेयोऽर्जनरसंप्राप्तावेदाःसांगाःसलक्ष्म
णाः॥३३॥कनिष्ठोवेदशून्योभूत्साधितोप्यतियत्नतः॥ज्येष्ठस्यविद्यावत्त्व
नविवाहोभूदयत्नतः॥३४॥कनिष्ठस्याश्वराभावाद्द्विजाहोनाभ्यजायत
एवंवर्षेषुकतिचिद्गतेष्वेतस्यसद्मनि॥३५॥कश्चित्सोथःसमागत्यपृष्टवान्वे
दसंपदं॥विद्यावत्त्वेहिभद्रस्यपृष्टेतस्यप्रजावती॥३६॥पांथंप्रत्याहमुग्ध
लेभूविष्यंतियदांकुराः॥तदास्यविद्यापृष्टव्यापोथकिंपृच्छसेधुना॥३७॥
इच्छप्रजावतीवाक्यंश्रुत्वाभद्रोतिदुःखितः॥देशाद्देशांतरंप्रागाद्द्वैराग्ये
णातिपूरितः॥३८॥कदाचिन्नर्मदातीरेकृतस्नानादिसत्क्रियः॥ब्रध्नामत
ध्यनावत्सदृष्टवान्ऋद्धतापसं॥३९॥नाम्नाप्रसिद्धंहारीतंतंप्रणम्यवचो
ऽब्रवीत्॥स्वामिंस्त्वमनिमूर्खंमांविद्धिचातिदरिद्रिणं॥४०॥वृथाजन्म
गतंतन्मेस्वदृष्ट्याकुरुसार्थकं॥प्रजावत्यादयःसर्वेयथानोपहसंतिमां
४१ तथासंपादयस्वामिन्मेकृपानुग्रहंकुरु॥इत्युक्तासहितस्यार्थे ८८
लुलुंठजगतीतले॥४२॥तंलुलुंठंतमालोक्यकारुण्यामृतवारिधिः
सत्राम्हउवाचेत्थमुत्तिष्ठोत्तिष्ठवेद्विजा॥४३॥त्यजचिंतांमनोनिश्वासवंका

नभपूरिणीं॥ऊर्ध्वदेश्यामितेकालीविद्यासर्वसुखावहां॥४४॥यदाराधनमा
त्रेणमूकःसर्वज्ञतामियात्॥दरिद्रोपिसमर्थस्थंप्राप्नुयान्नात्रसंशयः॥४५
॥इत्युक्तश्चतुराकालीमंत्रंचोपादिदेशह॥सांगंसमुद्रंसन्यासंसध्या
नमंत्रमुत्तमं॥४६॥पुपदिश्यतमाहासोद्विजोदीनैकवत्सलः॥गृहदक्षिण
देशरुंगच्छगच्छगोदावरींनदीं॥४७॥यस्यादर्शनमात्रेणसर्वपापैःप्र
मुच्यते॥प्रतिष्ठानेननद्यांस्नानेनेवांगुलीयकं॥४८॥यत्रस्नात्वारामती
र्थेपूर्वभागेकृतसुरः॥गोदावर्यांकृतस्नानस्तत्पुरश्चरणंकुरु॥४९॥
मासमात्रेणसाकालीप्रसन्नातेभविष्यति॥इत्युक्तमात्रोभद्रोसौप्रतिष्ठा
नेसमागतः॥५०॥दृष्ट्वागोदावरींरम्यांरामतीर्थाच्चपूर्वतः॥आवासंकल्प
यित्वातुगोदायांकृतमज्जनः॥५१॥कालीमंत्रपुरश्चर्यामकरोन्नियमेनच
मासमात्रेणसाकालीनृगोचरतामियात्॥५२॥पंचत्रिंशद्दशभुजाना
नालंकारभूषिता॥विचित्रवस्त्राशोभाढ्यादिव्यचंदनचर्चिता॥५३॥तां
दृष्ट्वाजगदीशानींभद्रोहर्षसमन्वितः॥कालीननामसाष्टांगंसातद्विजम
वोचत॥५४॥वरंवरयभद्रत्वंदुर्लभंयंयमिच्छसि॥भद्रःप्रोवाचतांकालीं
यदितुष्टासिमेंबिके॥५५॥मन्नामपूर्वकंदेवित्वन्नामास्तुनिरंतरं॥चतु
र्दशापिविद्यास्युर्ममजिह्वाग्रगोचराः॥५६॥एवंतुजगतांमातरस्तुयाषा
प्राप्तिरस्तुमे॥धनंचविपुलंदेहिसर्वभूतेषुयेदया॥५७॥अंतेचब्रह्मसायु

न्यदेहित्रैलोक्यसुंदरी॥ तथास्त्वितिजगद्धात्रीभद्रकाल्यूजगादतं॥६८॥
इतिकालीवचःश्रुत्वाभद्रोकालींसतुष्टुवे॥प्रणम्यावनतोभूत्वाकृतांजलि
पुटःसुधीः॥६९॥नोभद्रकालिजगदेकनिदानभूतेशाहत्वामरुघासिनिवि
श्वमातः॥६०॥मातःषडाननगजाननयोर्महेशिशक्रादिवंद्यचरणांबुरु
हेनमस्ते॥६०॥नोभद्रकालीत्वरसत्करुणाकटाक्षान्मूकोपिवाङ्मुखर
तामुपयातिशीघ्रं॥दीनोपिसर्वधनवद्धरतामुपैतिमाहात्म्यमेतदधुनाकि
मुवाचमाद्य॥६१॥नोभद्रकालित्वपादयुगंप्रपन्नंमर्त्यंनकालकलिजोभय
मुद्धरेत्॥तस्मान्मयित्वदनुगंविततरस्वविद्यायोषाधनधान्यरसमृ
द्धिमंबे॥६२॥इतिश्रुत्वाभगवतीभद्रकालीनिजास्तुतिं॥उवाचभद्रा
मानंवचस्तुतिमनोहरं॥६३॥त्वन्नाहंकविष्यामिभद्रकालीहवेस्थिरा
मत्प्रसादेनसद्विद्यायोषाधनयुतोभव॥६४॥तन्मस्तकेभद्रकालीह
स्तंसंरुजापयद्धरं॥तत्करस्पर्शमात्रेणसर्वाविद्याःप्रस्फुरंताः॥६५॥
सयोषाधनधान्यानितस्यप्रादानिचाभवन्॥भद्रकालीनियोगेनतदा
राधनतत्परः॥६६॥भद्रःप्रतिष्ठानपुरेसुखंवद्वारसंचकारह॥ततस्त्वा
भवत्तीर्थंभद्रकाल्योःसुखप्रदं॥६७॥भद्रकालीचतत्तीर्थेस्थिरामव
दनुत्तमा निजभक्तिंपराणांचसर्वकामप्रदायिनी॥६८॥तस्मात्तती
र्थंसुस्नातोभद्रकालीप्रपूज्यक॥सर्वान्कामानवाप्नोतिविद्यायोषा
धनादिकान्॥ ॥लक्ष्मीपति०॥ ॥इमांकथांमाधवःशृणोतिपठतवाभ

८०

क्तियुतोमनीषी॥श्रीभद्रकालीकृपयासविद्यानाप्नोतिकामान्सकलान्
नभीप्सान्॥७०॥ ॥इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमहात्म्येभद्रकाली
तीर्थवर्णनंनामपंचत्रिंशोध्यः॥ ॥ऋषयऊचुः॥ ॥सूतत्वंमुखनस्तात
भद्रकालीकथाश्रुता॥गणेशतीर्थस्येदानींकथांब्रूहिमनोहरां॥१॥
सूतउवाच॥ एवमेवपुरापृष्टोमाधवेनस्वयंगुरुः॥लक्ष्मीपतिस्तेयामा
हतांकथांप्रवदामिवः॥२॥ माधवउवाच॥ ॥श्रीनृसिंहवक्त्रपदपंकजभा
क्तकर्यलक्ष्मीपतेतवमुखाद्भद्रकाल्याः॥तीर्थंश्रुतंसमहिमंशुभदंत्वि
दानींश्रीमद्गणाधिपतितीर्थकथांवदाशु॥३॥ ॥लक्ष्मीपतिरुवाच॥
हेमाधवत्वांप्रतियन्मयोक्तंश्रीभद्रकालीयसुतीर्थमग्र्यं॥ततःपरं
श्रीगणनाथतीर्थमाहात्म्यमाकर्णयसौख्यदायी॥४॥पुरापराशरा
सुतंरक्षःसत्रंमयोदितं॥तत्रमंत्रबलात्तेनसंहारोरक्षसांकृतः॥५॥
त्रिषुभागेषुदग्धेषुतूर्यभागोव्यवस्थितः॥तस्मिन्संदग्धुमारेभेपुल
स्त्यस्तपितामुनिः॥६॥ स्वसंतानंचतुर्थंहिरक्षणायाभ्यगाद्दृत्तदा
पराशरंगृहेसोथतदादरमथाकरोत्॥७॥पूजांकृत्वाविधानेनतम
पृच्छत्पराशरः॥किमर्थमागतंस्वामिन्नित्युक्तोमुनिराहतं॥८॥पूर्णंकु
रुघसत्रंमसंतानक्षीणतांगतं॥पुलस्त्यवचनंश्रुत्वाधर्मात्मासपराश
रः॥९॥सत्रंपूर्णंचकारासौपुलस्त्याज्ञांचपालयन्॥तेनस्वाज्ञांकृतंद

ष्ट्वापुत्रस्यसन्तुष्टमानसः॥ ११ ॥पराशरायसमुनिर्वरंलोकोत्तरंददौ॥ परा
शरमहाप्राज्ञश्रेष्ठाज्ञाप्रतिपालक॥ ११॥विष्णोरंशावतारत्वंकलौभविष्यति
नसंशयः॥एवंतस्मैवरंदत्वापुत्रस्यःस्वाश्रमंययौ॥ १२॥ पराशरोपिधर्म
ज्ञोगुरुसिष्ठान्नुपालकः॥स्वोचितंकर्मकुर्वाणोबहुकालमुवासह॥ १३॥
कदाचित्तीर्थयात्रांसकर्तुमुद्युक्तमानसः॥गतोभागीरथीतीरेपरंतीरेच
यामुनिः॥ १४॥नोकामाराद्धुमोसोसवदत्यनुवाहिकान्॥कुत्राप्यन
काशनदुर्गंधासन्निधोमुनिः॥ १५॥उपविष्टानदीमध्यगतायांनाव्य
सावृषिः॥समन्मथस्तामुवाचसंगंदेहिसकलोचने॥ १६॥सोवाचमहाबुद्धे
दुर्गंधास्मिस्त्वमध्यगः॥सूर्योस्तिजनसंघोवाजागर्त्यत्रकथंभवेत्
॥ १७॥संगस्यावसरःस्वामिन्नेवंतांवादिनींप्रति॥पराशरउवाचेदम
दृंशायदिजायसे॥ १८॥त्वांयोजनसुगंधांवैकरिष्यामिनसंशयः
मध्यरात्रंतमोयुक्तंजनानामूर्छागतानपि॥ १९॥कोमार्यामेगमपिते
करिष्याम्यवधारय॥नारायणस्यदुर्दरेप्यंशादाविर्भविष्यति॥ २०॥
एवंतद्वाक्यमाकर्ण्यतद्धीनत्वमाययौ॥तत्कालेमध्यरात्रिश्चा
भवन्मूर्छागताजनाः॥ २१॥तांचयोजनसद्गंधामकरोत्सतपोबलात्
संगेजातेपुनर्मध्येदिनंजागरिताजनाः॥ २२॥पूर्वपारगतानोवैजनाःपा
रंगताभवन्॥पराशरोपिगतवान्स्नात्वातीर्थोत्तरंशुचिः॥ २३॥गते
षुसर्वेषुजनेषुसाविज्ञात्वास्वकीयेजवरेसुगर्भा॥गंगागतेद्वीपवरे

ससर्जसद्यातमात्रोद्भुतदिव्यदेहः॥ २४॥ नत्वानिजांतांजननीतदाज्ञामा
दायतीर्थांतरमानसायथौ॥ द्वीपेहियस्यायनमासतस्माद्वेपायनोसौ
जगतिप्रसिद्धः॥ २५॥नारायणांशोजगदेकबंधुर्वेदंविदित्वागहनं॥
चतुष्पदा॥स्वकारलोकैकहितायतस्माद्व्यासंतमाहुर्जगतामृषीशं॥ २६॥
नानास्तीर्थानुगतोहिगोदामघाप्यदिव्यापरपुण्यकंदा॥स्नात्वाघरं
गंगवतीजलेवैसिद्धेशमर्घादिभिरर्चयित्वा॥ २७॥व्यचारयल्लोक
हितंमनस्वीवेदंविभक्तंकृतवांजनानां॥ज्ञानंस्वधर्मस्यनवैभविष्य
त्येवंविदित्वाविदधेमतिंसः॥ २८॥श्रीभारताख्यानमहंकरोमीत्येवंस
लोककहितार्थबुद्धिं॥सचिंतयामासमदुक्तिसंघविलेखनेकोभवि
तासमर्थः॥ २९॥एवंविचार्यमाणेतुततोबुद्धतामियात्॥गणेशोभद्र
काल्यास्तीथात्पूर्वंप्रदेशगः॥ ३०॥कल्पयित्वागणेशास्यंतीर्थंगंगाप्रवा
हगं॥तत्रस्नात्वाभागवत्याव्यासःपरमधार्मिकः॥ ३१॥मंत्रंजजापपरमं
गणेशस्यमहात्मनः॥तस्यप्रत्यक्षतामापगणेशोभक्तवत्सलः॥ ३२॥
दृष्टेगणेश्वरेदेवेप्रणनामससंभ्रमी॥उत्थायगणराजेनमस्तोषी
हृच्चनेःशुभैः॥ ३३॥ ॥श्रीवेदव्यासउवाच॥ ॥श्रीमद्विनायकनिजांघ्रि
सरोजभक्तविघ्नाटवीदहनकारणसर्वसूत॥भृंगावलीभिरतिराजि
तगंडभित्तेतंत्वांगणाधिपमहंप्रणतोस्मिनित्यं॥ ३४॥श्रीमद्वजाननद
शाननपूज्यमानपंचाननाननसरोजबिलवल्कपद्म॥पंचाननप्रभृति

लेखगणेऽप्यमानंतत्वांगणाधिपमहंप्रणतोस्मिनित्यं॥३९॥लंबोदरस्वभ
जनातिनिपिक्तचित्तकामप्रपूरकरूरेंद्रपदेवदेव॥शार्वाणिबालाशशि
खंडविराजिमौलेश्रीमद्गणाधिपमहंप्रणतोस्मिनित्यं॥३८॥एवंस्तुति
समाकर्ण्यव्यासस्यामिततेजसः॥व्यासंवचउवाचेदंत्ववरंवरयेतिच॥३७॥
एवंतद्वचनंश्रुत्वावेदव्यासउवाचतं॥यदितुष्टोसिदेवेशयदिदेयोवरो
मम॥३८॥मदुक्तस्येतिहासस्यत्वंपरंलेखकोभव॥मदुक्तानाहिवाक्या
नोत्वांविनानेवलेखकः॥३९॥एवंव्यासवचःश्रुत्वागणाधिपउवाच
तं॥लिखेरालेखनीवेगोनभवेद्धतथाकुरु॥४०॥एवंश्रुत्वागणपतेर्व्या
सोवाक्यंतदाब्रवीत्॥स्वामिन्विचार्यश्लोकार्थान्श्लोकान्लिखग
णाधिप॥४१॥व्यासस्यचैवंनियमंकृत्वेगणेशालेखन्यपतच्छिरा
न॥त्वरांविनाज्ञातिगणेशालेखनेश्लोकेषुकूटानिसदैवविनिक्षिपन्
४२॥अथोमहाभारतान्यथवेशतानिश्लोकेषुकृतानिचकारकृष्णः
द्वैपायनोवेदविदोवरिष्ठःकृत्वेतिहासंवरभारताख्यं॥४३॥विश्रो
तिमापातिसुखप्रदामिनीरुद्रलेविचित्रेबदरीवनाख्ये॥गणेश्वरो
व्यासवचोनियोगोगोदातीरग्रंथकृतिस्तुबादरे॥४४॥गणेशयो
गेनकृतेतिहासेश्रीमन्महाभारतसंज्ञकेचे॥अपाठयत्सूर्यतम
कल्यषंमुनीनादनयंतंस्ववचोभिरादरात्॥४५॥वैशंपायनजैमि
निप्रभृतयोप्यापुर्महाभारतव्यासाख्यकेसुखावबोधादगणितश्री

यःपदप्रापकं॥एवंशिष्यपरंपरागतमहालोकप्रसिद्ध्यभूत्यत्पा
ठश्रवणाद्पिप्रकुरुतेलोकस्यशुद्धिंपरां॥४६॥तत्रकालमारभ्य
भद्रकाल्यतीर्थतः॥पूर्वतःश्रीगणेशास्यतीर्थमद्भुतमुच्यते॥
४७॥तत्रव्यासेनकृतेतपःपरमदुष्करं॥गणेशतुष्टयेतस्माद्व्यास
तीर्थमपिस्मृतं॥४८॥यत्रस्नात्वागणेशस्यपूजनोज्जपदानतः
सर्वसिद्धिमवाप्नोतिमानवोनात्रसंशयः॥४९॥॥रुक्ष्मीप॥॥
एवंपरंमाधवयन्मयोक्तंश्रीमद्गणेशाभिधतीर्थवर्यः॥आख्यानमे
तत्सगतिंशृणोतिवासविघ्ननाशंसकृतेचवेदति॥५०॥॥इतिश्री
ब्रह्मांडपुराणेप्रतिष्ठानमहात्म्यगणेशतीर्थवर्णनेनामषट्त्रिंशोध्या
यः॥॥ऋषयऊचुः॥॥गणेशतीर्थेनत्वद्दृष्ट्वाद्भुतंसूतमहाफलं॥इ
दानीमग्नेयंतीर्थंनद्दृष्ट्वाश्रुनःप्रति॥१॥॥सूतउवाच॥॥एतदर्थंपुरापृ
ष्टःस्वगुर्माधवनंदनः॥लक्ष्मीपतिस्तंयामाहतांकथांप्रवदामिवः॥२॥श्री
मद्गोमांप्रतियात्वयांकागणेशतीर्थायकथांपवित्रा॥तयामदीयंस
फलंप्रयत्नेनालक्ष्मीपतेन्यांवदसत्कथानः॥३॥॥रुक्ष्मीप॥॥माधवनूम
त्रियतीर्थमेकंतीर्थावलीभिन्नमपिप्रसिद्धं॥गोदावरीदक्षिणतीरसं
स्थंशृणुष्वहंमाधवसत्कथांत्व॥४॥अत्रेतिहासंवक्ष्यामिकण्वाख्यस्य
महामुनेः यस्यश्रवणमात्रेणचित्तंविश्रांतिमाप्नुयात्॥५॥आपस्त

बोमुनिवरः कृत्वा॥र्गारर्थानतः॥२॥आश्रमंशिष्यसंयुक्तः स्वकर्माण्यकरान्मुदा॥
ध्।तस्यापस्तंबसंज्ञस्यस्वकर्माणिप्रकुर्वतः॥बहुकालोव्यतीयायसशिष्य
स्यमहामतेः॥ ७॥यत्रस्थस्याभवन्शिष्याकण्वोदंडाप्यथर्वणः॥एभिःशि
ष्यैःसमेतस्यकालक्षेपंप्रकुर्वतः॥ ८॥सत्कर्मणामुनींद्रस्यासंहेगुरुरुण
यंया॥सिंहेगुरोरष्टतमंविचार्यगोदामहित्वासकलमुनींद्रः॥९॥सर्वार्त्ति
हंत्रीसकलार्थदायिनींगोदावरींकारुणिकोजगाम॥ १॥३आपस्तंबःसशि
ष्योथगोदावर्याविभूषितं॥प्रतिष्ठानंददर्शाशुदर्शनादघपापहा॥१०॥भोगा
वत्यांकृतःस्नानःकृतसिद्धेशपूजनः॥ग्राममध्येभद्रकालीसमीपैकस्य
चिद्गृहे॥ ११॥सर्वशिष्यैःसमेतोसौस्वकर्मनिरतःशुचिः॥वेदानध्यापय
त्स्वप्यान्स्वकालंचर्चनानयमः॥१२॥यत्रयत्रगृहस्थानांगोघ्नाकारिता
द्विजाः॥तत्रतत्राप्यगच्छंतभोजनार्थंनिमंत्रिताः॥१३॥कदाचित्कस्य
चिद्गेहेकण्वआकारितःशुचिः॥सादरंभोजितस्तेनययेयजमानेनधी
मता॥१४॥भुक्तोथितोविप्रवरःसकण्वोगृहांतरंगृहयेत्वरान्वितः।
मंत्राक्षतान्गृह्यप्रशोःसद्मकोगृहंविनिर्यायगुरोःसकण्वः॥१५॥
गृहस्थोबहिरागत्यनापश्यत्तत्रवैद्विजं॥शंकुंपप्रच्छवित्तदृष्टासाध्व ९२
भूद्गृहाधिपः॥१६॥यन्मंत्राक्षतयातोगणगतःशंकुःसपप्रच्छव्य
भूत्तन्मंत्राक्षतयाततोपिमनुजःकिंकिंनसंप्राप्नुयात्॥तस्माच्छोपित

छ्नूमंतंकवचाभिधमंत्रतः॥३०॥प्रदक्षिणानमस्कारैःप्रत्यहंनियतेंद्रि
यः॥त्वंतमाराधयतःकण्वस्याहरहः शुचेः॥३१॥मासत्रयेणप्रत्यक्षो
हनुमान्समजायत॥तस्मिन्प्रत्यक्षतापन्नहनूमतिसमाकराट्॥३२॥सा
ष्टांगंदंडवन्नत्वानुष्टावपरयामुदा॥ कण्वउ॥ ॥श्रीमन्नहनूमज्जगदेक
बंधोजवात्समुद्घंघितघारसिंधो॥सिंधुच्छलत्फेनकादहनातिदक्षत्वंपाहि
नःसर्वभयात्कपीश॥३३॥श्रीमद्रघूत्तमसवियोगविभ्रमसीतामहाशो
कनिवारणज्ञ॥ध्वस्तरक्षोगणहनूमंस्त्वत्पादपद्मंशरणंगतोस्मि
३४॥त्वत्पादपंकरुहमाश्रितानांसमस्तसिद्धिप्रदंदेवदेव॥भूतादिवि
द्रावकहनूमन्मदीप्सितंपूरयहकपींद्र॥३५॥इतिस्तुतिंसमाकर्ण्यह
नूमान्भक्तवत्सलः॥कण्वंप्रत्याहशोकण्वप्रसन्नोहंवरंवृणु॥कण्वउ॥
स्वामिन्कृच्छ्रेनगुरुणानीतोहंवेदशून्यतां॥तस्मात्वंदीनबंधुत्वात्सूर्यंप्र
त्ययमाहर॥३७॥अमानुषंसूर्यमुहंगुरुंतमिछामिकर्तुंजगतामधीशं
तस्माद्यथावत्समस्तविद्याहंवाप्नुयंतदनुष्ठितव्यं॥३८॥ ॥श्रीहनु
मानुवाच॥ साक्षाद्गाधरोहंरविकुलतिलकश्रीरघूत्तंसरामसी
तालाभायकीद्गाकर्तारंभवमहंतंविधायातिहृष्टः॥चाणाख्यप्रम
नुष्टाममपरशुवरुद्वातमायाम्यतीरंतिष्ठामिस्वायभक्तायिवरुक्ष
कुपहरःसर्वकामप्रदश्च॥३९॥ इदानींतवकामंवैपूरयिष्येनसंशयः
करग्रहणतस्त्वांवैनेष्येरविरथंप्रति॥४०॥इत्युक्त्वांतंकरंकृत्वाशणा

सूर्यरथंगतः॥रविणासत्कृतःसोथहनुमान्विसृष्टवान्॥४१॥स्वा
मिन्सूर्यगुरुंकर्तुंभवंतंवेत्तमीहते॥मत्कृतेतुग्रहाणत्वंमेनेब्राह्म
णसत्तमं॥४२॥अद्येत्युक्त्वाजगत्स्वामीहनुर्हृच्चसारविः॥उपवेश्यस्वा
श्वकर्णेगीतंमोदयतेमुनिं॥४३॥अध्यापयामासरविर्जुर्यशुक्ला
गिधंमहत्॥हनुमान्पुनरभ्यागाच्चाणाख्याश्रममंडलं॥४४॥कण्वोप्य
धीतवेदोविचाणाख्याश्रममंडलं॥प्रागात्सूर्यायनुज्ञातोहनूमंतंननाम
वं॥४५॥हनूमंतमुवाचेदंस्वामिंस्वत्कृपयामया॥सूर्यात्सुकृत्यजुर्ल
ब्धंवापमृषिव्रजैः॥४६॥ त्वत्तीर्थस्नानतःस्वामिन्दर्शनात्तत्रदेवहि॥
विदानवासवान्स्वामिंस्तस्मात्वत्तीर्थमुत्तमं॥४७॥भवतुभूवगश्रेष्ठसर्व
सिद्धिप्रदायकं॥ततःप्रोवाचभगवान्हनुमान्कण्वसत्तमं॥४८॥मत्तीर्थं
मज्जनपरायेमत्पूजनकारिणः॥नानाकामार्थिनस्तेवैसवान्कामानवा
नुयुः॥४९॥विद्यार्थिलभतेविद्याधनार्थिलभतेधनं॥रोगीप्रमुच्यतेरोगा
द्दृष्टामुच्यतबंधनात्॥५०॥गंगाविष्णुप्रसादेनमोक्षार्थीमोक्षमाप्नुयात्
त्वमिदानींमत्प्रसादात्कण्वसौख्यमवाप्नुहि॥५१॥श्रीहनुमत्प्रसादेन
कण्वःपूर्णमनोरथः॥अत्यंतसुखमापाहोगत्वास्वाश्रममंडलं॥५२॥ततः
प्रभृतितत्तीर्थंहनूमत्तीर्थमुच्यते॥सर्वान्कामानवाप्नोतिमाहात्म्यश्रव
णादपि॥५३॥ ॥लक्ष्मीप॥ ॥हनूमदाख्यानमिदंयदुक्तंहेमाधवत्वां

प्रतिमंगलावहं॥तस्यप्रपावादथसंश्रुतेश्चकल्याणमाप्नोतिसदामनु
ष्यः॥९४॥ ॥इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमहात्म्येहनुमत्तीर्थवर्ण
नंनामसप्तत्रिंशोध्यायः॥ ऋषयऊचुः॥ सूतत्वन्मुखतःस्तीर्थावं
लीमिन्नमपिश्रुतं॥हनुमत्तीर्थमाहात्म्यमिदानींवदतांवर॥१॥तीर्थाव
लीक्रमप्राप्तंरेणुकातीर्थगोचरं॥ माहात्म्यंब्रूहिसारंयत्कसाधनंश्रो
तृसौख्यदं॥२॥ सूतउवाच॥ ॥तीर्थावलीक्रमप्राप्तंरेणुकातीर्थगोचरं॥
माहात्म्यंसंप्रवक्ष्यामिशृण्वंतुयदहोपुरा॥३॥माधवेनादरात्पृष्टंश्रील
क्ष्मीपतिंशार्मणे॥लक्ष्मीपतिर्यत्तमाहतद्वाख्यानंवदामिवः॥४॥माध
वउवाच॥ ॥वैकुंठकंठीरवभक्तवर्यलक्ष्मीपतेत्वन्मुखतःश्रुतंमया॥हनू
मदाख्यानमतीवपुण्यंयदाधुनापूर्वजरेणुकाकथां॥५॥लक्ष्मीप॥
हेमाधवत्वांप्रतियन्मयोदितंहनूमदाख्यानमिदंशुभंगलं॥शृणुष्वि
दानींवररेणुकाकथांतीर्थावलीमध्यगतांमुदान्विदां॥६॥पुराकुरुक्षेत्र
गतायदासरायज्ञार्थमुद्योगयुताबभूविरे॥तदानमुच्यादयआततायी
नाविघ्नप्रचक्रुर्बहुदेत्यसंयुताः॥७॥पुनर्ब्रह्माणमाजग्मुर्यज्ञस्यकलगवेषि
णः॥धातारमूचुस्तेसर्वेकुरुक्षेत्रंत्वयाकृतं॥८॥यज्ञस्यकलंनोनिश्चित्स
त्वरापद्रवमागतः इदानींनःकलंब्रूहियंहेत्वैनिरुपद्रुतं॥९॥एवंसंप्रा
र्थितोदेवैर्ब्रह्मातान्प्रत्यवोचत॥प्रतिष्ठानंमहाक्षेत्रंममप्रेमास्पदंम
तं॥१०॥यत्सिद्धेश्वरधिनंत्रिभुवनाधीशानसर्वोत्तमानामिहास्यनत्व

धिष्ठितंस्वकरंयद्रेणुकाधिष्ठितं॥ नानादेवताधिष्ठितंदुरितहंश्रीभो
गवत्यादिभिस्तीर्थैश्चापिसशोभितंपरमहोयज्ञार्थमेतत्कलं॥११॥एवंनि
श्चित्यतेसर्वेब्रह्माणंपुनरूचिरे॥त्वमस्माभिःसहागच्छप्रतिष्ठानपुरेशुभे
१२॥यावद्यज्ञःसमाप्येततावत्त्वंसन्निधोभव॥त्वंब्रह्मासर्वलोकाना
माद्योलोकपितामहः॥१३॥त्वदागमनमात्रेणयज्ञोनिर्विघ्नतामियात्
एवमुक्तेसुरैर्वाक्यंब्रह्मातैःसहितोययौ॥ १४॥प्रतिष्ठानंमहाक्षेत्रंमुक्ति
मुक्तिप्रदायकं॥सिद्धेशमष्टमूर्तिंतंदृष्ट्वाभोगवतींनदीं॥१५॥भोगव
त्यांकृतस्नानाःकृतसिद्धेशपूजनाः॥संतोषंपरमंप्रापुर्बृहस्पतियुरो
गमाः॥१६॥ततश्चतत्रर्त्विज्यंचैपूर्वतोगणनायकात्॥यज्ञशालांप्र
कुर्वंतःकांचनस्तंभमंडितां॥१७॥अत्यंतरम्यगोदांबुलहरीगणशो
तितां॥स्वर्णारणेर्ढीयमानध्वजतोरणमंडितां॥१८॥अगस्त्यादीनसमा
ह्वयन्ऋग्वित्वेनसमारणात्॥अध्वर्युरत्रिरभवद्वसिष्ठोहोत्रयोजितः
१९॥विश्वामित्रोभवद्ब्रह्मक्रतुरात्मीध्रतामियात्॥एकतश्चद्वितश्चै
वत्रितआरुणिकस्तथा॥२०॥पुद्वात्पोहत्तनेष्टारोमैत्रावरुणिरेवच
एवंयथाक्रमंसर्वेमुनयश्चर्त्विजोभवन्॥२१॥सोऽत्रत्विग्गणोपेतोब्र
ह्मस्तंपुरोगमः॥ यज्ञारंभंसमकरोद्यजमानःशतक्रतुः॥२२॥इंद्रा
णीसहितस्तत्रमंडपस्थःशतक्रतुः॥गणपार्चापूर्वकंचपुण्याहादि

वयंक्रतोः॥२३॥ अंगजातंसमकरोद्दक्षिणैः सहितः शुचिः॥ एवंयागेसमा
रब्धेनमुच्याध्वरादयः॥२४॥आरुरोधुर्विघ्नकर्त्तारोयज्ञविध्वंसनोद्य
ताः॥ तान्दृष्ट्वाप्रबलान्यज्ञध्वंसकानागतानरीन्॥२५॥इंद्रादिदेवताःसर्वा
ब्रह्माणंशरणंययुः॥ब्रह्मासुरगणैःसार्द्धंरेणुकांध्यातवान्हृदि॥२६॥सा
त्विकीजगदीशास्यायाशक्तिःपारमार्थिकी॥तामाकारयदीशानींसर्वशा
क्तिसमन्वितां॥२७॥आगच्छरेणुकेदेविसर्वशक्तिसमन्विते॥आगच्छ
रेणुकेदेविसायुधात्वंसशक्तिका॥२८॥दैत्येभ्योभयमुत्पन्नंविनाश
यजगन्मयि॥इत्येवंब्रह्मणोवाक्यंश्रुत्वासर्वजगन्मयी॥२९॥रेणुकाशा
क्तिभिःसार्द्धंप्रादुर्भूताऽभवत्क्षणात्॥ऐंद्रीगजसमारूढावज्रहस्तविलस
त्यलिः॥३०॥घण्टेनाच्छादयंतीसुदैत्यांस्तत्रसमाययौ॥आग्नेयीमेषसंरूढा
शक्तिपाणिस्त्वरान्विता॥३१॥दैत्यान्निजघ्नतीरक्षानुप्रतिष्ठानेसमाययौ॥या
मीमहिषमारूढाकालदंडसहस्करा॥३२॥नैर्ऋतीस्वायुधकरातथैवप्रे
तवाहना॥धारुणीपाशहस्ताचतुरंगवरवाहना॥३३॥वायवीस्वायुधक
रादैत्यघ्नीमृगवाहना॥गदाशोभितहस्ताचकौबेरीनरवाहना॥३४॥ऐशा
नीवृषसंरूढावेदधनुर्बाणेनसंयुता॥त्रिशूलखट्वांगधराशोभयीवृषवा
हना॥३५॥ब्राह्मीहंससमारूढाकमंडल्यक्षमालिनी॥कौमारीशक्ति
हस्ताचमयूरवरवाहना॥३६॥धाराद्यैःप्रमुखाष्टाभ्योरेणुकांप्रत्यपद्यि
ताः॥ऊचुस्ताःशक्तयोदेवीरेणुकांभक्तवत्सलां॥३७॥वयमाकारितामा

तकिमर्थमितितद्वद॥दैत्युत्कारेणुकादेवीताऽब्रूहजगदंबिका॥३८॥दै
त्यान्घातयताशेषायुधैरतिबलान्विताः॥तच्छ्रुत्वावचनंदेव्यारेणुकायाः
करान्विताः॥३९॥निजघ्नुर्दैत्यसैन्यानिप्रबलानिसहस्रशः॥शाक्तिकेदै
वसैन्येश्चदैत्यसैन्यंपराजितं॥४०॥बहुधानिहतंतत्रदृष्ट्वावशिष्टंपुरोयि
तं॥वाद्यशिरकमभूद्दीनंपातालंप्रययौद्रुतं॥४१॥एवंविध्वंसितंदैत्यसै
न्यंदृष्ट्वाःस्वशक्तिभिः॥संतोषंपरमंजग्मुस्तदाब्रह्मादयःसुराः॥४२॥तस्य
रेणोःसाष्टांगंभक्तिनम्रात्ममूर्तयः तुष्टुवुर्जगतांधात्रीरेणुकांभक्त
वत्सलां॥४३॥ ॥देवाऊचुः॥ व्यासत्यलोकस्थितवेदवल्कपंकेरुहा
व्यासवेशक्तिरूपा॥मातास्समस्तस्यचराचरस्यतांरेणुकांत्वांप्रणतास्म
हृद्यां॥४४॥वैकुंठनिष्ठाखिललोकनाथविष्णोरुदाराचरितस्यशक्तिः
लक्ष्मीर्हिलोकत्रयविश्रुतायातांरेणुकांवैप्रणतास्महृद्यां॥४५॥अशेष
सपत्नरिपूर्णहृद्यकैलासलोकावसथस्यशंभोः॥याशक्तिरीशस्य
महेश्वरस्यतांरेणुकांत्वांप्रणतास्मनित्यं॥४६॥स्तोत्रेणास्तुवतांदेवीमेवं
सर्वेदिवौकसां॥प्रसन्नाभवदीशानीप्रत्यक्षंप्राहरेणुका॥४७॥प्रस
न्नाहंसुराःसर्वेवरंवृणुतपुत्रकाः॥यंयमिच्छतकामंवैतंतंदास्यामिनि
श्चितं॥४८॥देवाऊचुः॥यदायदाहिनोमातर्विघ्नंप्राप्तंभविष्यति
तदातदाजगद्धात्रीनिवारयसंकटं॥४९॥अन्यमेकवरंदेहिसर्वशा
क्तिसमन्विते॥यत्तीर्थंभूःप्रसन्नात्वंतत्तीर्थवरदाभव॥५०॥इदंहिर

णुकातीर्थंत्विन्नाम्नाख्यातमस्तुवो॥अत्रतीर्थेचयेस्नांतित्वत्स्मृतिंयेप्रकुर्वते॥९१॥३रम्माभिर्यत्कृतंस्तोत्रंतवतत्पठणेरताः श्रोतारश्चापियेनित्यंतेषांकामान्प्रपूरय॥९२॥एवंविज्ञापितादेवीजगतीर्थजगन्मयी॥३ध्दत्युक्त्वाजगद्धात्रीतत्रोतद्धानमागमत्॥९३॥रेणुकायाःप्रसादेन देवानांक्रतुरुत्तमः॥सांगोपांगःसमाप्तोभूद्वैखिकादास्यमीयुषा॥९४ ततस्तंकालमारभ्यरेणुकातीर्थमुत्तमं॥गणेद्वानीतीर्थात्पूर्वस्यांसर्व कामप्रदायकं॥९५॥ लक्ष्मीप०॥ ॥इदंहिमाधवरेणुकायास्तीर्थस्य महात्म्यमतिप्रशस्तं॥शृण्वंतियेचैवपठंतिनित्यंतप्राप्नुवंतीहसमा स्तकामान्॥ ९६॥ ॥इतिश्रीब्रह्माडपुराणप्रतिष्ठानमहात्म्येरेणुका तीर्थवर्णनंनामअष्टत्रिंशोध्यायः॥ ॥ऋषयऊचुः॥रेणुकातीर्थमाहा त्म्यंसूतत्वन्मुखतःश्रुतं॥भोगवत्यास्तुमाहात्म्यइदानींवक्तुमर्हसि १॥सूतउ०॥ ॥एवमेवपुरापृष्टोमाधवेनस्वयंगुरुः।सतमाहयदा ख्यानंतदाख्यानंवदामिवः॥२॥माधवउवाच॥ ॥श्रीलक्ष्मीनृसिंहदा सस्कमतेलक्ष्मीपतेसद्गुरोत्वद्वक्त्रोत्तमादरेणसुखदश्रीरेणुकातीर्थगं॥माहात्म्यपरितापहंत्वमधुनाश्रीभोगवत्याःपरमाहात्म्यवदशि ष्यमानसगतध्वांतापहर्तःप्रभो॥ ॥श्रीलक्ष्मीप०॥ हेमाधवत्वांप्र तियत्नायोक्तंश्रीरेणुकाख्यानमतिप्रशस्तं॥उतथत्वमाकर्ण्यभोग वत्यामाहात्म्यमत्यादरयुक्तचित्तः॥४॥इदानींभोगवत्यास्तुमहिमा

MEMORIAL

नंवदामिते॥यस्यश्रवणमात्रेणनरःपापैःप्रमुच्यते॥९॥अत्रेतिहासंवक्ष्या मिश्रोतृचित्तातितोषदं॥यस्यस्मरणमात्रेणवाजपेयफलंलभेत्॥६॥ अदित्याप्रार्थितोदेवोहृतभाग्यमरुत्वतः पुनर्भाग्योपलब्ध्यर्थमो वज्रंगतापतिः॥७॥पूर्वंश्रीवामनोदेवोबलेर्दर्पंहंजगामह॥श्रीहरेः परितोषायकुर्वतेयज्ञमुत्तमं॥८॥तंदृष्ट्वामुनयःसर्वेप्रत्युज्जग्मुर्गुणा न्विताः॥तेनानत्वासमानीयसदस्युच्चासनोपरि॥९॥उपविश्यमुनींद्रा स्तेविचारंचक्रुरादृताः॥तेविचारंप्रकुर्वाणावामनाकृतिमीश्वरं॥१०॥व लिननामशिरसापप्रच्छकुशलंनामतः॥तंवामनउवाचेदंविद्धिमांभू मिकामनं॥११॥किंतेस्तिकुशलंनामाद्यांप्रयोजनमिदम॥कियतीं भूमित्युक्तेबलिक्रमत्रयसम्मितां॥१२॥दत्तेत्युक्तेनतोदेवोधारापूर्वमुदा वत॥धारापूर्वंचदत्तायांभूमौवामनकोहरिः॥१३॥एकेनक्रमणेनाहो पातालान्यक्रमद्धरिः॥द्वितीयेनक्रमणेनसोसत्यलोकंतमावृणोत् १४॥तृतीयेनक्रमणेहाभिन्नब्रह्माण्डमुत्तमं॥तस्माद्धारासमुत्पन्नासुतो र्थोदमयीशुभा॥१५॥निजव्यापारपात्रेवैनज्जलंब्रह्मणाधृतं॥तेनाभि षिक्तंश्रीविष्णुपदंप्रणम्यस्वयंभुवा॥१६॥तद्विष्णुपादोद्भवतीर्थवा रिधनंकपर्दंगिरिजाधवेन॥चतुःप्रकारंतदभूत्तलंवैमंदाकिनीस्वर्ग गताबभूव॥१७॥भागीरथीचापिचगौतमीचापृथिव्यामतिशो भमाने॥पातालगाभोगवतीप्रसिद्धाबभूवतद्लोकसुखैकदात्री

१८॥ ब्रह्मांडरचनाकाले ब्रह्मणाप्रार्थितोहरः। ब्रह्मांडकरसामग्रीं देहिमे
जगतांपते ॥१९॥ इतिप्रार्थितएवासौहरोभक्तजनप्रियः। उवाचधातसमाहूय
वःपृथिव्यादिस्वरूपधृक्॥ २०॥ हृत्थ्यप्रतेजोमरुद्व्योमयजमानरवींदवः
एवंरूपोवपुर्धत्तेभुक्तदाब्रह्मकाराज्जगत्॥ २१॥ कृत्वाजगत्समग्रंहि ब्रह्मा
लोकपितामहः। स्वनिवासार्थमकरोत्कर्मभूमोयहियद्दृनं॥ २२॥ नामाख्या
तंप्रतिष्ठानंतत्रतेपेतपोमहत्॥ सिद्धिकामेनमहतातपसाराधितःशि
वः॥ २३॥ प्रत्यक्षंसमभूद्दीशःख्यातःसिद्धेश्वराभिधः॥ जगतामुपकारा
यदर्शनस्पर्शनादिभिः॥ २४॥ ततः प्रवाहाब्रह्मांडकटाहोद्भूतवारिजाः
भूरिकालंगतेःभूवन्नरागत्वंगाःशिवदर्शने॥ २५॥ गोतमप्रार्थितादेवी
गोतमीपापनाशिनी॥ सिद्धेशदर्शनायाहोप्रतिष्ठानेसमागता॥ २६॥
ब्रह्मणारचनिलंकुंडंतत्राहूतोहरिःस्वयं॥ तत्सादसमवादेवीभागीरथ्यथ
गादहो॥ २७॥ तद्दक्षिणेगोर्मुखतोजाताम्दाकिनीनदी पातालसंगता
देवीभोगवतिसौख्यदा॥ २८॥ सिद्धेश्वराभिषेकायतन्मूस्तकविनिःसृता गोदाभागीरथीमंदाकिनीभोगवतीतिच॥ २९॥ समंगश्चवतस
र्णासर्वपापौघनाशनः॥ सर्वपापहरःपुंसांस्नानात्तर्पणतोपिच॥ ३०॥
येनमार्गेणनिर्याताशुभाभोगवतीनदी॥ तेनमार्गेणनिर्यातःशो
णोपिजगतीतरं॥ ३१॥ तेनस्वनाम्नावाख्याप्यलिंगंद्वोषेश्वराभिधं
यस्यदर्शनमात्रेणविषबाधानृणांनहि॥ ३२॥ यदायागार्थमायाताब्र

ह्मादिसकलामराः॥ तदातत्समुदायेनस्थापितंलिंगमुत्तमं॥ ३३॥ क्षमेश्व
रनाम्नावैसर्वकामप्रदायकं॥ शिवोनिःपरिपंथित्वाच्छुलमुत्सृष्टवान्पुरा
३४॥ तदावहुदिनंत्यक्तःशूलश्चितामवापह॥ शिवेनोपेक्षितोस्मीतिव
हुदुःखनदुःखितः॥ तदापुरुषरूपेणतपापपरमंतपः॥ ३५॥ स्वनाम्ना
लिंगमास्थाप्यशूलेशाभिधमादरात्॥ तदग्रेशूलपुरुषएकोगुप्तमहो
श्रितः॥ ३६॥ निरन्नोहितपस्तेपेबहुकालमतंद्रितः॥ ततश्चतुष्टोभगवा
ंस्तस्मैशूलायशंकरः॥ ३७॥ वरंवरयशूलेतितमेशोगुर्वचोब्रवीत्
तमाहशूलोदेवेशाः प्रीतोसियदिशंकर॥ ३८॥ त्वद्वियोगोनमेभूयादि ति
दंयावरोमम॥ अन्यमेकवरंदेहियददेयोवरोमम॥ ३९॥ शूलकुंडमि
तिख्यातंमत्तीर्थंभवत्वहो॥ तन्मध्यदेशेशूलेशस्त्वमत्रावस्थितो
भव॥ ४०॥ शूलकुंडेस्नानायेशूलेशार्चकानराः॥ तेषांबहुदिनस्थोपि
शूलस्तोदंनकालय॥ ४१॥ यातुवापित्रारोशूलःकटिशूलस्तथैवच॥
तथेत्युक्त्वासभगवान्लिंगेतत्रांतरधानमापसः॥ ४२॥ ततस्तंकालमास्थाय
शूलकुंडंमहागुणं॥ नितंबजाठरशिरोमहाशूलनिवारणं॥ ४३॥ तस्मा
च्चतुर्घतिपुण्यसंगमः श्रीभोगवत्याख्यसुपुण्यतीर्थं॥ यस्मिंश्चतु
र्लिंगधराहरःस्वयंवियंविराजतेयोऽष्टतनुर्धरोपि॥ ४४॥ नसिद्धे
श्वरमंलिंगंतीर्थंभोगवतीसमं॥ प्रतिष्ठानंसमंक्षेत्रंनभूतंनभविष्य
ति॥ ४५॥ तस्माद्भोगवतीतीर्थंसर्वतीर्थाधिकंमतं॥ यत्रसिद्धेश्वरो
देवःसर्वसिद्धिप्रदायकः॥ ४६॥ यदश्वमेधादिमखैरनुत्तमैर्महाफ

लेराचरितेर्नृपोत्तमैः॥अवाप्यतेसत्फलमल्पबुद्धिभिस्तदाप्यतेभोगवतीनिमज्जनात्॥४७॥सूर्यग्रहेक्षेत्रवरेहिकोरवैर्युपुण्यदेःस्वर्णतुलादिदानैः
अवाप्यतेयत्फलमल्पबुद्धिभिस्तत्प्राप्यतेभोगवतीनिमज्जनात्॥४८॥य
न्माघमासेतिफलैप्रयागोग्निश्रादिनैः स्नानफलंप्रजायतेनिमज्जतःप्राणि
गणस्यसम्यक्कृतदाप्यतेभोगवतीनिमज्जनात्॥४९॥केदारदेशेबदरीवने
चश्रीशंभुनारायणपूजनात्फलं यदाप्यतेसाधुमनोभिरीप्सितंतदाप्यते
भोगवतीनिमज्जनात्॥५०॥यदाश्रमाथादिजनाभिलाषदज्योतिर्महालिं
गसमूहपूजनात्॥यद्विष्णुकांचीसुरयविष्णुहृद्यक्षेत्राभिषात्राभिरघाप
तेफलं॥५१॥जितेंद्रियैःप्राणिभिरल्पचित्तैरमदाप्यतेभोगवतीनिमज्जनात्
रुधूम्रपानैर्जलघासरुद्धिःपंचाग्निसेवानिरतैश्चयत्फलं॥५२॥यन्माघ
मासादिभिरप्यवाप्यतेतदाप्यतेभोगवतीनिमज्जनात्॥एवंविधाभोग
वतीमहानदीस्वनामपाठाच्छ्रवणाच्चहृद्या॥५३॥अन्यापदेशादपिमुक्ति
दायिनीकिंभक्तितःसंश्रवणाच्चपाठतः॥५४॥अत्रेतिहासंवक्ष्यामिभक्त्या
माधवतंशृणु॥यस्यश्रवणमात्रेणमनस्तोषोभिजायते॥५५॥पुराभागीर
थीनीरमणिपूराख्यपत्तने राजासुभद्रकोनामप्रजापालनतत्परः॥५६॥
तस्यराज्ञःपुरेचासीद्देश्यापरमसुंदरी॥नाम्नाभोगवतीख्यातासर्वलक्ष
णलक्षिता॥५७॥तस्मिन्पुरेसमभवन्नाम्नाख्यातोहिभद्रक॥द्विजवरोसौ
मुद्भूतोद्विजलक्षणवर्जितः॥५८॥संशिक्षितोपिपित्राचवेदशास्त्राण्यशेषि
तोभवत्॥जन्मांतरीयपापनटूरादरतोभवत्॥५९॥स्तेयवेश्यासुरापान

मुखरापरतःसदा॥एवंकालेव्यतीतेतुतस्ययौवनमागते॥६०॥भोगवत्यां
तुवेश्यायांतस्यप्रेमाभिजायत॥तद्विनातामहोरात्रंनव्यजायतकिंचन॥
६१॥अन्यैश्चितेनदुष्टेनयौवनंतन्निषेवणात्॥यत्रकुत्रापिचबहिःपर्यटंस्ता
मनुस्मरन्॥६२॥तांचिंतयन्नामसेनकालंनयदनेकधा॥द्यूतेरतश्चौर्यतो
पियद्द्रव्यंसमुपार्जयत्॥ ६३॥ तत्सर्वंभोगवत्येससमर्पयदनन्यधीः॥
नहव्यंचोपिकव्यंचतेनविप्रेणसोकरोत्॥६४॥एवंससंवतस्तस्यवेश्या
भोगवतींसदा॥क्षणाद्यौवननाशोभूत्पश्यतःपश्यतोपिच॥६५॥कुरू
पस्तीतसर्वंगोबभूवाव्यविग्रहः॥तथापिवेश्याप्रेमासीनतत्याजदुरा
त्मवान्॥६६॥तयाकदाचित्स्वपशुगणमार्थेपुरांतरं प्रेषितस्तद्धनोसौ
तत्पशुग्राममापच॥६७॥तत्रदिनीष्यहाण्येषक्रमित्वाज्वरितोभवत्
महाज्वरेणसंतप्तःसोऽत्यावस्थामुपेयिवान्॥६८॥अंतकालेसमायो
तेयआगतिसन्निधौ॥तंसंवदनिमांतातातनयोगावतीमिति॥६९॥ये
येसमागतास्तत्रतास्तान्प्रयंवमुक्तवान्॥वारंवारंभोगवत्यानामसंकी
तयन्नसौ॥७०॥मरणंप्रापयामात्माभोगवत्यनुचिंतक॥तंनेतुंतयमग
णाआययुःपाशपाणयः॥ ७१॥खड्गमुद्गरहस्ताश्चलिंगिभिर्धोतिताद्दिनः
अत्यंतघोररूपास्तानागतान्प्रविलोक्यसः॥७२॥अत्यंतभीतचित्तोभू
द्विनादंहातरंगतः॥बद्ध्वातंदृढपाशाद्यैस्ताड्यमानोतिनिष्ठुरैः॥७३॥
तंबध्नतोताड्यमानंतुयावत्तेनेनमुद्यताः॥तावद्विमानमारूढोऽगमु

दूताःसमागताः॥ ७४॥ऊचुस्तेयमदूतांश्चमुंचेनुर्द्विजपुंगवं॥अपयांतु
भवंतोवेयदिजीवितुमिच्छथ॥७५॥तेप्यूचुस्तांछ्रुदूतानाबाल्मा
दतिगर्हितः॥अयंनेवधवद्भिर्हिस्पृष्व्योवैकृपातकी॥७६॥याम्यान्
चुःशृणुदूतास्त्वयंपुण्यकृतांवरः किंपुण्यमितिवैपृष्टेनानेचुःशिवा
नुगाः॥७७॥यावैभागवतीदेवीविष्णुपादाब्जनिःसृता॥शंभुचूडामणि
र्यावैसानेनेनासरुत्स्मृता॥७८॥तस्माद्भागवतींस्मृत्वानभवद्लोकम
हंति॥शिवलोकाययांग्योयंशंकरप्रेमभाजनं॥७९॥पुनस्तेशंकरान्
दूतान्प्रत्यूचुर्यमकिंकराः॥वेत्रयादृश्योनचानेनरुताभागवतीस्मृतिः
८०॥नगंगादृश्यानस्तस्मादयंनरकमर्हति॥शिवाःपुनर्जगुर्याम्यान्यस्मा
त्कस्मात्स्वकीरतः॥८१॥सर्वपापापहर्त्रीचप्रोक्ताभागवतीस्मृतिःतस्मा
द्यूयंप्रयातस्वलोकमेनंविहायवै॥८२॥एवमुक्तादयेवैनंकृत्वासूर्य
वर्चसं॥विमानमाधिरोप्याहैनयन्कैलासमंदिरं॥८३॥तस्माद्भागव
तीतीर्थंसर्वतीर्थोत्तमोत्तमं॥यस्यस्मरणमात्रेणमुच्यतेसर्वपातकैः
८४॥लक्ष्मीपतिः॥ ॥यस्मादियंभागवतीमहाफलानामस्मृतिःस्नो
नजलाद्विपानतः॥पापौघहंत्रीस्मरसंघसेवितातस्मात्सुसेव्यानित
रांमहात्मभिः॥८५॥एवंहिहमाधवभागवत्यामाहात्म्यमत्यादरतःपठंति
येचापिशृण्वंतिमहानुभावाःस्तेषांचपापंक्वचदीदृशंनस्यं॥८६॥येमो
गवत्याहिमाहात्म्यंशृण्वंतिचपठंतिच॥तेषांकामान्पूरयंतिसिद्धेशोभो

गवत्यपि॥८७॥ ॥इतिब्रह्मोइपुराणेपवित्रानमाहात्म्येभोगवतीमहि
मावर्णनंनामैकोनचत्वारिंशोध्यायः॥॥ब्रह्मोवाच॥ ॥शोषतीर्थमि
तिख्यातंसर्वकामप्रदंशुभं॥तस्यस्वरूपंवक्ष्यामियन्मयापरिभाषितं॥
१॥राक्षसादैत्यदनुजाप्रविष्टाश्चैरसातले॥तैर्निरुद्धाभोगपतिमामुवा
चथकिंकुरु॥२॥रसातलेचयद्दत्तंराक्षसानांमयापिच॥तेमेरुद्धानंन
दाश्यंतिनरमात्वांशरणंगतं॥३॥ततोहमब्रुवन्नागंगोतमींयाहिप
न्नगा॥तत्रस्तुत्वामहादेवंलप्स्यसेत्वंमनोरथं॥४॥नान्योस्तिलोकत्रितये
मनोरथवरप्रदः॥महाक्यप्रेरितोनागोगंगामाप्लुत्ययत्नतः॥५॥स्तुंज
लिपुटोभूत्वातुष्टावत्रिदशेश्वरं॥ शेषउवाच॥ जयत्रैलोक्यनाथायदक्ष
यज्ञविभेदिने॥आदिकर्त्रेनमस्तुभ्येनमस्त्रैलोक्यरूपिणे॥६॥सोमाय
सूर्यरूपायतेनमः॥सर्वदासर्वरूपायकालरूपायतेनमः॥७॥त्राहिशंक
रसर्वज्ञत्राहिसोमेशसर्वदा॥जगन्नाथनमस्तुभ्यंदेहिममनसेप्सितं
॥८॥ततोमहेश्वरःप्रीतःप्रादादन्नागेप्सितान्वरान्॥विनाशायामरारीणां
दैत्यदानवरक्षसां॥९॥शेषायप्रददौशूलंजघ्नेनरिपून्नागान्॥ततःशे
षःशिवेनाशुशेषःशूलेनयोगिभिः॥१०॥रसातलमथोगत्वानिजघानर
णेरिपून्॥निहत्यनागःशूलेनदैत्यदानवराक्षसान्॥११॥न्यवर्त्ततपुन
र्देवीयत्रशेषेश्वरोहरः॥यथायेनसमायातोदेवद्रष्टुंसनागराट्॥१२॥
रसातलाद्यत्रदेवोविलंतत्रव्यजायत॥तस्माद्विस्तारंलगतंगंगाबोधंति

पुण्यदं॥१४॥तद्वारिगंगामगमद्गयोःसंगमस्ततः॥देवस्यपुरतश्चापिकुं
डंतत्रविनिर्मलं॥१५॥नागरत्नाकरोद्भूतंतत्रचाग्निःसमुत्थितः॥सोऽग्नंत
त्रतदावारिगंगायास्तत्रसंगमे॥१६॥देवंदेवंसमाराध्यनागःप्रीतोमहाय
शाःपरसातलंतत्रोभाभ्यांशिवात्साप्यलंकृतः॥१७॥ततःप्रभृतितत्तीर्थ
मुष्णतीर्थमितिस्मृतं॥सर्वकामप्रदंपुण्यंरोगदारिद्र्यनाशनं॥१८॥आयु
र्लक्ष्मीकरंपुण्यंस्नानदानादिपुण्यदं॥शृणुचाऽन्यपवेद्भक्त्यायोवापिस्म
रतेच्चतत्॥१९॥तीर्थंश्रेयेश्वरायत्रयत्रशक्तिप्रदःशिवः॥एकंविंशति
तीर्थानांमुभयोस्तत्रतीरयोः॥२०॥ज्ञातानिमुनिशार्दूलसर्वसंपत्तिदानि
च॥२१॥ इतिश्रीब्रह्मांडपुराणेप्रतिष्ठानमहात्म्येत्रोषतीर्थवर्णनेनाम
चत्वारिंशोध्यायः॥ ॥ऋषयऊचुः॥ श्रुतंत्वन्मुखतःसूतमाहात्म्यंपर
माद्भुतं भोगवत्यामहापापघनाग्नेःसौख्यदायकं॥१॥महानलेश्वरस्या
नमिदंनोब्रूहिसत्तम॥यस्यस्मरणमात्रेणपरंसौख्यमवाप्यते॥२॥सू
तउ॰॥ एवमेवपुरापृष्टेमाधवेनाहितेच्छुना॥श्रीलक्ष्मीपतयेतेनयदुक्तं
हृदामिवः॥३॥ माधवउ॰॥श्रीमल्लसंहाननाथंबुजभजनसमाराधना
रक्तचित्तश्रीमल्लक्ष्मीपतेश्रीगुरुवरतवसद्भक्तोश्राविहृद्य॥आख्या
नंभागवत्याःश्रुतिसुखकरणंसंतापहारिव्याघ्राट्व्याख्यंइदानींकथय १००
शुभमतेसत्कथांहृद्यरूपां॥४॥ लक्ष्मीपतिरुवाच॥ ॥व्याघ्राट्व्याःशृ
ण्विदानींकथांविचित्रांनिव्यपनोदकर्त्रीं यत्रश्रीमान्नंदवोमहेशो
व्याघ्रेशाख्यादर्शनादाघहारी॥५॥महानलेशोपिचतत्रदेवोमहानल

रूपांपितमूर्तिरास्ते॥तत्रत्यमाख्यानमहंवदिष्येशृण्वाशिष्योत्तमसावधानः
६॥पिप्पलेशाघ्रसंगेनयाख्यांचमयोदिता॥महानलश्चश्रीशंभोर्भी
मनेत्रसमुद्भवः॥७॥पिप्पलाद्प्रार्थितेनशोकरणार्थंविनिर्मितः॥तेनसंस्थापि
तेलिंगंतन्महानलसंज्ञितं॥८॥आदौव्याघ्रेशलिंगस्यमहिमानंवदामि
ते॥शृण्वाद्यहितःसाधोव्याघ्रेशाख्यानमुत्तमं॥९॥प्रतिष्ठानेस्थितःकश्चि
च्चित्रनामाद्विजाधमः॥ गृहश्रमनिष्ठोवेविप्रैःकलहकारकः॥१०॥आक्रोशी
परसंतापीसर्वत्रदुष्टमानसः॥निरंतरंदुष्टवाक्यवक्ताछिद्रगवेषकः॥११॥
ब्रह्मणाबहुवस्तेनछलितापापकारिणा॥ ततःसर्वैर्द्विजैःशप्तस्त्वंदुर्व्या
घ्रोभवेतिवै॥१२॥सशप्तस्तान्प्रणम्योचेमामुद्धरतभोद्विजाः॥इतिसंप्रा
र्थितास्तेवैतंप्रत्यूचुःकृपान्विताः॥ १३॥त्वंव्याघ्रोभवितोचेनब्रह्मवाक्यान्न
संशयः॥त्वदुद्धारेप्रवक्ष्यामोक्षयंत्वमधुनात्यज॥१४॥त्वत्पुत्रःशुकूनामावै
व्याघ्राट्व्यांमहामतिः॥घडवारंगमेलिंगंव्याघ्रेशंस्थापयिष्यति॥१५॥तदा
राधनमात्रेणव्याघ्रदेहःपतिष्यति॥नवोत्तमगतिंविप्रप्राप्स्यतिनसंशयः
१६॥ इत्युक्त्वाविरतेविप्राश्चित्रोव्याघ्रोभवक्षणात्॥व्याघ्राट्व्यांदुष्टबु
द्धिर्जीवमात्रविहिंसकः॥१७॥एवंससप्तवर्षेषुगतेषुद्विजपुंगवाः कृपा
लवोद्विजत्वंशुकूनामानमूचिरे॥१८॥हेशुकूत्वंसितातेव्याघ्रत्वंस
मुपायिवान्॥स्वकर्मणातमुद्धर्तुंतमिदानींत्वमर्हसि॥१९॥घडवासंगमेग
त्वाव्याघ्राट्व्यांमहामते॥व्याघ्रेशलिंगंसंस्थाप्यपित्रृंद्विजात्तमर्चय॥२०

नदाराधनमात्रेणव्याघ्रत्वान्मुच्यतेपिता॥इतितेषांवचःश्रुत्वाश्वित्रःशुक्लात्म
जःसुधीः॥२१॥वडवासंगमंगत्वास्नात्वाऽभ्रेद्वारसंज्ञिते॥लिंगंसंस्थाप्यवि
धिवत्तंसंपूज्ययथाविधि॥२२॥तत्पूजाश्रेयसोदानूंपितृदेहान्नराकरोत्॥
तस्मिन्काले त्वहोव्याघ्र आगत्येहचतत्स्थले॥२३॥दहंतंत्याजयेव्याघ्रंदिव्य
रूपधरोभवत्॥दिव्यरूपधरंदृष्ट्वापितरंजातविस्मयः॥२४॥लिंगपूजनपु
ण्यनदेवंस्तोतुंप्रचक्रमे॥ हिजउ०॥ जयदेवसुराध्यक्षजयचंद्रार्धशेख
र॥२५॥जयमृत्युंजयरुद्रजयोग्रालविलोचन॥जयभस्मावलिप्तांगजयम
न्मथदाहक॥२६॥जयसंसारदुःखापपारावारपराधिप॥जयशूलाग्रसंघा
तनिपातितगजासुर॥२७॥जयत्वनामसंस्मर्तुःसंश्रोतृदुरितापह॥ज
यसर्वसुराजेयत्रिपुरध्वंसकारक॥२८॥गजचर्मपरीधानजयहीप्यन्नि
नादवत॥जयोमारमणस्वामिन्जयगंगाधरप्रभो॥२९॥जयराजतकैला
सवासभक्तेष्टदायक॥जयामरशिरोरत्नविराजितपदांबुज॥३०॥जय
सच्चित्परानंदरूपनिर्गुणशाश्वत॥जयत्रिलोकजनकजयत्रैलोक्यर
क्षक॥३१॥जयत्रैलोक्यसंहारकर्त्तश्चांतेनिरंजन॥जयनाथकृपापार
पारावाररूपानिधे॥पाहिमांदेवदेवेशदीनविश्रांतिकारक॥३२॥जयेमम
पितादेवपापात्माव्याघ्रतांगतः॥३३॥त्वत्पूजनप्रभावेनयातुकैलासम
दिरं॥हित्वाव्याघ्रतनुंतप्तस्वर्णदिव्यवपुर्धरः॥३४॥सर्वदात्वांप्रपन्नोस्मि १०१
शंभोत्रैलोक्यनायक॥इतिस्तुत्वाजगन्नाथंपुनरूचेमहेश्वरं॥३५॥अत्रव्या
घ्रेशनाम्नावैस्थिरोभवजगत्पते॥वडवासंगमेस्नानंयेत्वत्पूजापरायणाः॥३६॥

संसारव्याघ्रजंतेषांभयंमास्तुजगत्पते॥अद्येत्युक्तामहादेवोलिंगेतद्धानमा
गमत्॥३७॥ततस्तेकालमारभ्यव्याघ्रेशोलोकविश्रुतः॥वडवासंगमेदेवो
दर्शनायमहात्मणां॥३८॥इतोमहानलेशस्यवदाम्यारव्यानमुत्तमं॥महान
लःपूर्वमुक्तःपिप्पलादेननिर्मितः॥३९॥देवान्संहर्तुकामेनशंकराद्भुकितो
पिनालात्॥शंकरंशरणंजग्मुर्भीतादेवामहानलात्॥४०॥सदेवःपिप्पला
दंतंसमाधायस्थकिंकरं॥महानलादभीतिंचदेवेभ्यःप्रददौकिल॥४१॥
ततोमहानलोदेवःप्रोवाचवचनंत्विदं॥प्रविशास्यसमुद्रंत्वंमद्विभूते
महानल॥४२॥ततःसशंकराज्ञप्तोवाडवासंगमेगनः॥तत्रसंस्थापय
ल्लिंगंस्वनाम्नाहरनेत्रजः॥४३॥तुष्टावजगदीशानंशंकरंनीललोहि
तं॥महानलोनिराकारोवाचाललितयाभवं॥ ४४॥ महानलउवाच॥
नमामिजगदीश्वरंत्रिभुवनाधिनाथंभवज्वरनिवर्त्तकंफणिवरोद्भसत्कं
डलं॥गजाजिनकृवासमेकमलशांभिमद्भोचनंमनोभवविदाहकज्वल
नाभालनेत्रमृडं॥४५॥हरंकदलिजाचलप्रभंगृहीतलीलातनुकुठारमृ
गशाणितंगरलपानराजद्गलं॥विशालरजताचलालयनिवासिनंभू
लिनंमहाबलहतांधकंत्रिपथगाविराजज्जटं॥४६॥भुजंगपतिसिंजि
नीयुतंसमस्तशक्रादिकामरालयद्वारासनहरिशरंपुरध्वंसिनं॥न
मज्जनकदंबकामितकृताघनाशक्षमाभिधानमनिशंभजेभवभवंत
मन्यादगात्॥४७॥ इतिस्तुतिंसमाकर्ण्यमहानलसमीरितां॥जगदा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

त्मानमाहात्म्युत्त्वेश्वरंवरयेतिच ॥ ४८ ॥ महानलोश्वरंवन्नेत्वस्तुतिंमत्कृतां
नरः ॥ यः पठेच्छृणुयाद्वापितत्कामान्प्राप्यपरिवलान् ॥ ४९ ॥ अन्ते स्वत्कामदे
हादेवालिंगतेर्दानुभोगमान् ॥ ननस्तदाज्ञयासौऽग्निः सरस्त्यात्प्रवाहि
तः ॥ ५० ॥ अत्रभासेसागररक्षितश्चिरंतत्रावसच्छुचिः ॥ ५१ ॥ लक्ष्मीपति० ॥ तेकी
लमाराध्यमुद्दादर्वागतोव्याघ्रश्चरश्चापिमहानलेश्वरः ॥ उभौस्थितौतत्रवे
श्वरप्रदायकौपूजाविधानादलिपापहारिणौ ॥ ५२ ॥ इदंहियमाधवपापना
शनमाख्यानमाकर्णनतश्चपाठनः ॥ शृण्वंतियेवैयपठंतिसादरास्तमा
नवास्युश्चसमृद्धकामाः ॥ ५३ ॥ ॥ इतिश्रीब्रह्मांडपुराणेप्रतिष्ठा
नमाहात्म्येव्याघ्रादवीव्याघ्रेश्वरंमहानलेश्वरनामत्रिचत्वारिंशोध्यायः
॥ ॥ इतिप्रतिष्ठानमाहात्म्यंसमाप्तं ॥ ॥ शके १७४९ सौभा
नुनामसंवत्सरेपौषशुद्धपंचम्यांसोमवासरेतद्दिनेगौरोपनामविष्णुस
नकेशवेनलिखितं ॥ शुभंभवतु ॥ ॥ श्रीरस्तु ॥ ॥ श्रीतुलजाकुलदेवता
अथशकफालः पूर्वप्रत्यामस्ति ॥ ॥ अस्यां शके १८०० क्रोधननामसंवछरे
पौषकृष्णा ६ रविवासरेतद्दिनेडोंगरेत्युपनाम्नाभिकदेवेन प्रतिष्ठा
नक्षेत्रेलिखितं ॥ शुभंभवतु ॥ ॥